नं० ६६४-घ

(वेदान्तशास्त्रम्) वेदांतसारः सुबोधिनी टीका

सटिकः

पत्राणि ४३ (सम्पूर्णम्)

नं० ५५४-घ

कर्ता नृसिंह सरस्वती

पत्राणि ४२

नं० ११४६८ [illegible] टीका [illegible]

[illegible]

ॐ श्रीगणेशाय नमः ॥ यमात्मानं इदं ज्ञात्वा परमानन्दमद्वयं । वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीं ॥ इह
खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशिर्नानाविधाध्ययनेन तदर्थावगतेन वि
षयानामनिर्वचनीयभावस्वरूपाज्ञानविलसितानन्तभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्ति
कप्रायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नान्तःकरणः सन् ऋषिकादिदृष्टान्तदर्शितनिर्मल
निर्मलाशयान्तस्तिमितलिनीदलगतजलबिन्दुवद्धिरण्यगर्भादिस्तम्बपर्यन्तं जीवजातं स्वात्मतुल्यतया पश्यन्
गीतं तत्त्वाभंगुरं तापत्रयाग्निदंदह्यमानं मत्वा निश्चयात्मकनये पश्यता मतिविवेकिनाऽत एवैहिक
स्रक्चन्दनादिविषयभोगेभ्यः आमुष्मिकहिरण्यगर्भादिपदभोगेभ्यश्च वान्ताशनवत् निर्विण्ण
मानसः शमादिसाधनसम्पन्नानामाप्ततोऽधिगताखिलवेदार्थतात्पर्याद् ब्रह्मादिकारणपर्यन्तं न श्रद्धा
येन तद्विलक्षणस्वप्रकाशस्वरूपं प्रत्यगात्मनि ब्रह्मानन्दे तेम श्रायापत्नान्तं नज्जिज्ञासता महान्तं
मलाज्ञाननिवृत्तिपरमानन्दावाप्तिसिद्धये प्रकरणमारभमाणः तत्समाप्तिप्रचययगमनादिफलक
स्याशिष्टाचारप्राप्तत्वेनेष्टदेवतानमस्काररूपलक्षणमङ्गलाचरणस्यावश्यकर्तव्यतामर्थतः
ग्रन्थतः प्रदर्शयन्बन्धुतच्चप्रयत्निरूपयन् परमप्रमाणं नमस्कुरुते अखण्डमित्यादिना अखण्डमिति अभीष्टस्य्तिः अथ
स्यासिद्धये प्राप्यमात्मानमाश्रयेदात्मैकतत्त्वप्रतिपद्यं स्यार्थः ननु विषयस्यात्मनः कथं प्रतिपत्तिरि

यतो वाचो निवर्त्तन्त इत्यादिश्रुतिभिरविषयत्वप्रतिपादनात्प्रतिपत्तिविषयत्वं कारणतोपलक्षितत्वस्य विषयत्वे
नौपचारिकमिति भावः ननु एवमपि ब्रह्मणः कारणत्वेन तटस्थवदनियतत्वात्प्राकाम्यप्रदत्वात् सदिति नाश
भावोपलक्षितस्वरूपं सदेव सौम्येदमग्र आसीदित्यादिश्रुतेः ननु तथापि जडत्वापत्तिमाशंक्याह चिदिति स्वप्रका
शं चैतन्यस्वरूपमिति यावत् ननु तथाप्यपुरुषार्थत्वात्किमित्याशंक्य यत्तोषमित्यत आह आनंदमिति परमानं
दरूपमित्यर्थः ननु भक्तिनेपि लग्नेन नष्टान्तोबाधितिति मायेन प्रपंचस्याधिष्ठानत्वाभिरिक्ततया प्रतीयमानत्वा
त्कथमद्वैतसिद्धिरित्याशंकां निराकुर्वन्नाह अखण्डमिति सजातीयविजातीयस्वगतभेदशून्यमित्यर्थः अत्र

अखंडं सच्चिदानंदमवाङ्मनसगोचरं आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये १ अर्थतोप्य
द्वयानंदानतीतद्वैतभानतः गुरूनाराध्य वेदांतसारं वक्ष्ये यथामतिः २ ॥ ॥ ॥

सच्चिदानंदमिति प्रयोजनं अखंडमिति विषयः शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः संबंधः तत्का
मोधिकारी इत्यनुबंधचतुष्टयमर्थादुक्तं भवति किंच यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः
प्रकाशन्ते महात्मन इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्रांगतप्रतिपादनात्तन्नमस्कारोपि अवश्यं कर्तव्य इ
त कार्य इति तत्कृतिपूर्वकमभिधेयं ग्रंथं प्रतिजानीते अर्थतोपीति अपिशब्देन न केवलं शब्दतः किंत्वर्थतोपि
द्वितीयं ज्ञानमात्रं व्यवस्थितमपि न अर्थतः शब्दतश्चेति अद्वयानंदान् गुरूनाराध्य वेदांतसारं यथामति वक्ष्ये इत्य
न्वयः अद्वयश्चासावानंदश्चाद्वयानंदस्तानद्वयानंदान् अत्र हेतुमाह अतीतद्वैतभानत इति ॥ ॥ ॥

वे·सा· र· २ 2

तद्वैतभानतइति अतीतंगतंद्वैतभानंयतः तस्मात् इतीतद्वैतभानतः निरस्तसमस्तभेदज्ञानत्वादित्यर्थः मा
नगम्यत्वाराध्यकायवाङ्मनोभिर्नमस्कारगोचरीकृत्य वेदान्तसारं वेदान्तानामुपनिषद्वाक्यानां मध्ये यत्सा
रंसिद्धान्तरहस्यं यस्मिन्ज्ञाते पुनर्ज्ञातव्यं नावशिष्यते तं वेदान्तसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये इति
पादद्वयस्यार्थः २ इदानीं सर्वस्यापि वस्तुविचारस्योद्देशपूर्वकत्वात्प्रतिज्ञातं वेदान्तं नामतो निर्दिशति
वेदान्तइति उपनिषदेव प्रमाणमुपनिषत्प्रमाणम् उपनिषदो यत्र प्रमाणमिति वा तदुपकारीणि वेदान्त
वाक्यसंग्राहकाणि शारीरकसूत्रादीनि अथातो ब्रह्मजिज्ञासेत्यादीनि सूत्राणि आदिपदेन भगवद्गीता

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च अस्य वेदान्तप्रकरणत्वात्तदीयैरे
वानुबन्धैः तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः तत्रानुबन्धो नामाधिकारिविषयसंबन्धप्रयोजनानि

यथा तच्छास्त्राणि यद्यपि तेषामप्युपनिषच्छेषत्वादिति भावः ननु यद्यप्यवान्तरानुबन्धचतुष्टयमा
पद्येतेति निर्दिष्टं तथापि परमानुबन्धचतुष्टयस्यानिरूपितत्वादत्र प्रेक्षावतां प्रवृत्तिर्न स्यादित्यत आह अस्ये
ति अस्य वेदान्तसारस्येत्यर्थः ननु वेदान्तशास्त्रस्यापि किमनुबन्धचतुष्टयं येनास्यापि तद्वत्तासिद्धिः स्याशाका
मूलशास्त्रस्यानुबन्धचतुष्टयमाविष्करोति तच्चेति अनुबन्धचतुष्टयमेवाह यथोद्देशमधिकारिणं लक्षय
ति अधिकारी त्विति स्वाध्यायोऽध्येतव्य इति वचनात्त्रैवर्णिकानामुपनीतानामध्ययने नियमेन विधिप्रयुक्तमे राम· २
वाध्ययनं नाध्यापनविधिप्रयुक्तं तथा चाधी ॥ ॥ ॥ ॥

तो वेदो वेदांगानि च शिक्षाकल्पव्याकरणछंदोज्योतिषनिरुक्ताख्यानि यतस्तेनापाततोधिगताखिल
वेदार्थः अत्र सर्ववेदार्थस्य स्वेन ज्ञाते सति तत्र ग्रंथवैयर्थ्यपरिहारायापाततइत्युक्तं नन्वनधीतवेदानामपि
विदुरादीनां तत्वज्ञानोपपत्तिदर्शनाद्वेदाध्ययनतत्पूर्वककर्मानुष्ठानवैयर्थ्यमाशंक्योत्तरमाह जन्मांतर इ
ति तेषामाधुनिकाध्ययनाद्यभावेपि जन्मांतरीयाध्ययनादिना चित्तपरिपाकवत्तामस्मिन्जन्मनि विनाध्य
ध्ययनादिनाज्ञानोत्पत्तौ बाधकाभावान्नाध्ययनादिवैयर्थ्यमिति भावः काम्येति काम्यस्यापि कर्मणो धर्म
अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोधिगताखिलवेदार्थोस्मिन्जन्मनि जन्मांतरे वा काम्यनि
षिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया निता
तनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमाता काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि निषि
द्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावंदना
साधनत्वेपि यातायातसंपादकत्वेन बंधकत्वान्निषिद्धवत्तद्वर्जनपुरःसरम् दीनि नैमित्तिकानि पुत्रजन्माद्य
रमित्युक्तं तथा च नित्यादिकर्मानुष्ठानेन निर्गतनिखिलकल्मषतया निःशेषनिरस्तसकलकल्मषत्वेन
अत्र निखिलपदं काम्यनिषिद्धजनितस्य कृत उक्तं तत्परं तेन नितांतनिर्मलस्वांतः नितांतमत्यंतं निर्मलं स्वच्छं
स्वांतमंतःकरणं यस्य सः तथोक्तः वक्ष्यमाणसाधनचतुष्टयसंपन्नः प्रमाता अंतःकरणप्रतिबिंबितचैतन्य
मित्यर्थः एतदेव स्पष्टयति काम्यानि स्वर्गादीति तत्र प्रथमं लक्षयति प्रामस्यावदिति ॥ ॥

वे·सा·
र·
६
3

वहितिययातीव्रायांवुभुक्षायांभोजनतादृशोव्यापारोमनसोनरोचतेभोजनेविलंवेनसहतेतथात्तत्कंस्ना
दिविषयेष्वत्यंतमरुचिः ततज्ञानसाधनेषुश्रवणमननादिष्वत्यंतमभिरुचिर्जायतेतदाएवंवासं
नावलात्कुवणादिसाधनेभ्यउड्डीयमानंस्वकंकृत्वादिविषयेषुगच्छमानंमनः येनांतःकरणवृत्ति

नुवंधीनिनित्यतेषूत्यादीति प्रायश्चित्तानिपापक्षयसाधनानिकृच्छ्रचांद्रायणादीति उपासना
निसगुणब्रह्मविषयमानसव्यापाररूपाणिशांडिल्यविद्यादीति एतेषांनित्यादीनांबुद्धि
शुद्धिःपरंप्रयोजनंउपासनानांतुचित्तैकाग्र्यंतमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंति
यज्ञेनदानेनतपसानाशकेनेत्यादिश्रुतेः तपसाकल्मषंहंतिविद्ययामृतमश्नुतइतिस्मृते
श्च नित्यनैमित्तिकप्रायश्चित्तोपासनानांतु अवांतरफलंपितृलोकसत्यलोकप्राप्तिः कर्म
णापितृलोकोविद्ययादेवलोकइत्यादिश्रुतेश्च साधनानिनित्यानित्यवस्तुविवेकेहामुत्रार्थ
फलभोगविरागशमदमादिषट्संपत्तिमुमुक्षुत्वादीनिनित्यानित्यवस्तुविवेकःतावन्नसैवनि

विशेषेणानिवर्त्यंतेमुमुक्षुमहत्तयार्थः इदानींशमस्यलक्षणमाह शमइति ज्ञानसाधनश्रवणादिसाधनेभ्यो
विलक्षणेषुशब्दादिविषयेषुप्रवर्त्तमानानिश्रोत्रादीनिवाह्येन्द्रियाणियेनवृत्तिविशेषेणानिवर्त्यंतेसद

एम·
६

लक्षणमाह निवर्त्तितानामिति निगृहीतानामेव तेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादि
विषयेषु प्रयातानामिन्द्रियाणां सर्वथा न गच्छतीति तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्य
र्थः उपरतेर्लक्षणान्तरमाह अथवेति विहितानां नित्यादिकर्मणां विधिना चतुर्थाश्रमस्वीकारेण कर्म

त्यागमनित्यमिति विवेचनं ऐहिकानां स्रक्चन्दनादिविषयभोगानां कर्मजन्यतयानित्यत्वात् आमुष्मि
कानामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिः इहामुत्रफलभोगविरागः
शमदमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः शमस्तावच्छ्रवणादिव्यतिरिक्तविषये
भ्यो मनसो निग्रहः दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्त्तनं निवर्त्तितानां तेषां तद्व्यति
रिक्तविषयेभ्य उपरमणमुपरतिः अथवा विहितानां कर्मणां विधिना परित्यागः तितिक्षा शी
तोष्णादिद्वन्द्वसहिष्णुता ॥

णां परित्यागः नाहं कर्त्तेत्यवस्थानमुपरतिरित्यर्थः तितिक्षा शीतोष्णया लक्षणमाह तितिक्षेति शी
तोष्णस्य शीतोष्णादेर्द्वन्द्वस्य सुखदुःखादेश्च शरीरस्य त्यक्तुमशक्यत्वात् प्रकाशविरूपस्वात्मनि च शी
तोष्णादेरत्यन्ताभावादिति विवेकदीपनमिथ्याभानस्य शीतोष्णादिद्वन्द्वस्य यत्सहनं सा तितिक्षेत्यर्थः इदा
नीं समाधानलक्षणमाह निगृहीतस्य मनस इति ॥ ॥ ॥

वे॰सा॰ मनस इति शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारके-
टी॰ षु अमानित्वादिसाधनविषयेषु समाधिर्नैरंतर्येणावस्थितं समाधानमित्यर्थः अद्धादयः सुगमाः
५ तथा च पूर्वोक्तसकलविशेषणविशिष्टः प्रमाताधिकारीत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति
शान्त इति यद्योरेदृशं विषयं निरूपयति विषय इति अविद्याध्यारोपितसर्वज्ञत्वकिंचिज्ज्ञत्वादिवि-

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषयेषु च समाधिः समाधानं गुरुवेदान्तवा-
क्येषु विश्वासः श्रद्धा मुमुक्षुत्वं मोक्षेच्छा एवंभूतः प्रमाताधिकारी शान्तो दान्त इत्यादिश्रुतेः
उक्तं च प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे गुणान्वितायानुगताय
सर्वदा प्रदेयमेतत्सततं मुमुक्षव इति विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां
तात्पर्यात् संबन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाण-
स्य च बोध्यबोधकभावलक्षणः

रुद्धधर्मपरिभागेनावशिष्टं शुद्धचैतन्यस्वरूपमेव सर्वेषां वेदान्तवाक्यानां विषय इत्यर्थः क्रम-
प्राप्तं संबन्धं लक्षयति संबन्ध इति बोध्यबोधकभाव इति बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य रामः
वेदान्तशास्त्रस्य च बोध्यबोधकभाव एव संबन्ध इत्यर्थः अवशिष्टं प्रयोजनमाह ॥ ॥ ५

प्रयोजनं त्विति ब्रह्मात्मैकत्वलक्षणविद्याऽगतात्ज्ञानतत्कार्यसकलप्रपंचनिवृत्तिः पुनरप्यभावरूपा स्वस्वरूपानंदप्राप्तिः फलमित्यर्थः ननु लोके अप्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टं अत्र तु नित्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात्कथं फलत्वमिति चेन्न अप्राप्तस्यैव पुरुषार्थत्वनियमाभावात् यथा लोके कस्यचित्कंठस्थकंठमणेः तत्प्रयुक्तशोकानिसंदृश्यमान

प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च तरति शो
कमात्मवित् ब्रह्मवेद ब्रह्मैवेत्यादिश्रुतेः ॥ ॥ ॥ ॥ ॥

स्याप्राप्तौ परेणोक्ततत्काले स्वकंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फलत्वं दृष्टमेवमत्रापि नित्यप्राप्तस्या त्मनः अज्ञानमोहांधकारावृतत्वेन विस्मृतस्वस्वरूपस्य पुरुषस्य गुरुश्रुतिवाक्यश्रवणानंतरमज्ञानमोहांधकारनिवृत्तौ सत्यां स्वयंप्रकाशमानचिद्रूपस्य सिद्धस्यैवात्मनः फलत्वमप्युपपद्यत इति भावः उक्तार्थे श्रुतिं प्रमाणयति तरति शोकमात्मविद् ब्रह्मविद् ब्रह्मैव भवतीत्यादीति अधुना शास्त्रारंभनिमित्ताधिकार्यादि निरूपणानंतरं शास्त्रारंभं प्रस्तौति अथवालस्तितस्याधिकारिणः कर्तव्यं दर्शयति अथमधिकारीइति ॥ ॥

वे·सा· धिकारिणः कर्त्तव्यं दर्शयति अयमधिकारीति उक्तलक्षणलक्षितो बुद्धिसंनिहितोधिकारी गुरुमुप
टी· सरतीत्यन्वयः ननु संसारासक्तचित्तस्य विषयलोलुपस्यातिरहितस्य गुरूपसर्पणमयुक्तमित्याशंक्या
५ ह संसारानलसंतप्त इति संतापे हेतुमाह जननेति आदिशब्देनाध्यात्मादयो गृह्यन्ते संतप्तस्यैव गुरूप
5 सर्पणमित्यत्र दृष्टान्तमाह प्रदीप्तशिरा इति अर्धदग्धमस्तको दाहनिवृत्तिकामो यथा शीतलं जलराशि
मनुसरति तथा संसारतापत्रयदह्यमानस्तन्निवृत्तिकामः स्वस्वरूपजिज्ञासुः संसारनिवर्त्तकं श्रोत्रियं ब्र

अयमधिकारी जननमरणादिसंसारानलसंतप्तो प्रदीप्तशिरा जलराशिमिवोपहारपाणिः
श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतेः स
परमकृपयाध्यारोपापवा

ह्मनिष्ठं करतलामलकवत्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुं समीपं गत्वानुसरति मनोवाक्कायकर्म
भिः सेवत इत्यर्थः अस्मिन्नर्थे श्रुतिमुदाहरति समित्पाणिरिति अथ गुरुकृत्यमाह स परमकृपयेति
स पूर्वोक्तो गुरुरेनं शिष्यमुपदिशतीत्यन्वयः ननु परमहंसमपि ब्रह्मरूपं कस्मादुपदिशतीत्यत आह राम·
कृपयेति कृपातिरेकेण साधनान्तराभा ॥ ॥ ५

वादित्यर्थः ननु अखंडस्य ब्रह्मस्वरूपस्यागोचरत्वेनोपदेष्टुमशक्यत्वात्कथमुपदिशतीत्यत आह अध्यारोपेति
अखंडब्रह्मस्वरूपस्यागोचरत्वेन विधिमुखत्वेनोपदेष्टुमशक्यत्वेपि नेह नानास्ति किंचनेत्यादिश्रुतिमनुसृ
त्याविद्याध्यारोपितमिथ्यानानापदार्थनिषेधमुखेनोपलक्षितमखंडचैतन्यमेव पुनः सत्यंज्ञानमनंतब्र
ह्मेत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनाप्युपदिशतीति भावः तत्र श्रुतिमाह तस्मैहति अस्मिन्न
र्थे लौकिकदृष्टांतमाह असर्पभूत इति व्यावहारिके वस्तुत्वेनाभिमते रज्जाववस्तुभूतसर्पारोपो नामवस्त्व

न्यायेनैनमुपदिशति तस्मै स विद्वानुपसन्नाय प्रशान्ततत्त्वेशादित्यादिश्रुतेः असर्पभूतायां र
ज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः वस्तु सच्चिदानंदमद्वयं ब्रह्म अज्ञानादिसकलजडसमूहो
ऽवस्तु अज्ञानं तु सदस ॥

वच्छिन्नचैतन्यस्थाविद्या सर्पज्ञानाभासाकारेण परिणममाना सर्पाकारेण विवर्तते स विवर्तो रज्ज्ववच्छिन्नचै
तन्यनिष्ठाविद्योपादानत्वेनाद्यं सर्पः किं तु रज्जुरिति विशेषदर्शनोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारेण
ज्ञानानिवृत्तौ सर्पभ्रांतिर्निवर्तत इत्यर्थः उक्तमर्थं दार्ष्टांतिके योजयति वस्त्विति कालत्रयाबाध्यात्मै
व वस्तुशब्दार्थः अवस्तुस्वरूपमाह अज्ञानादीति अज्ञानतत्कार्यसमुदायो मिथ्यात्वात्तुच्छत्वात्सावयवत्वा
त्सापेक्षसिद्धिकत्वादित्यादिहेतुभिरवस्तुत्वमित्यर्थः एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपमाव
ह अज्ञानंत्विति किमिदम ॥ ॥

वे·सा· ज्ञानं सद्रूपमसद्रूपं वा नाद्यः तस्य शशविषाणतुल्यत्वेन तत्कल्पनानापि द्वितीयः असतः कारणत्वानुपप
१· त्तेरित्याशंक्याह सदसद्भ्यामिति सत्वेनासत्वेन वा निरूपयितुं न शक्यत इत्याह अनिर्वचनीयमिति ननु ज्ञानस्यानिर्वचनी
६ यत्वे सर्वथा ज्ञातुमशक्यत्वात् ज्ञानभावप्रसंगमाशंक्याह त्रिगुणात्मकमिति अजामेकामित्यादिश्रुतिभिः
सत्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः ननु एवमज्ञानस्य श्रुतिप्रसिद्धस्याप्यात्मादिरूपेण
विततस्य सत्यवद्ब्रह्मसमानत्वेन संसारानिवृत्तिरित्याशंक्याह ज्ञानविरोधीति एतेनाच्छमयत्यज्ञानमात्मसा
क्षात्कारेण निवर्त्तत इत्यर्थः तदुक्तं भगवता दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यते मा

ज्ञानमनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किंचिदिति वदंति अहमज्ञ इत्यनुभवात्
देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व
ह्रियते तथाहि ॥ ॥ ॥

यामेतां तरंति इति ज्ञानाभाव एवाज्ञानमिति तार्किकमतं निराकरोति भावरूपमिति त्रिगुणात्मकभावरू
पत्वेपि इदमित्थमेवेति परिष्कृत्य प्रदर्शयितुं न शक्यत इत्याह यत्किंचिदिति किमप्यचिंत्यत्वादपरीक्ष्यमि
त्यर्थः अनिर्वचनीयभावरूपाज्ञानसद्भावेऽनुभवमेवोदाहृत्य प्रदर्शयति अहमज्ञ इति अहमज्ञो मामहं न जानामी
त्यपरोक्षावभासप्रत्यक्षप्रमाणमित्यर्थः तस्यैवोपष्टंभकत्वेन श्रुतिमुदाहरति देवात्मशक्तिमिति अज्ञानं वि
भजते इदमिति वस्तुतोऽज्ञानस्यैकत्वेपि समष्ट्यभिप्रायेणैकमिति ॥ ॥ ॥ राम·
६

णबहुत्वेनव्यष्ट्यभिप्रायेणानेकमित्यर्थः तदेवप्रपंचयितुंप्रतिजानीते तथाहीति यथाबहूनांवृक्षाणांस
मुदायविवक्षयावनमित्येकत्वव्यपदेशः यथाबहूनांजलानांसमुदायविवक्षयाजलाशयइत्ये
कत्वव्यपदेशः तथांतःकरणोपाधिभेदेननानात्वेनप्रतीयमानानांजीवगताज्ञानानांसमुदायविवक्षया
ज्ञानमित्येकत्वव्यपदेशइत्यर्थः अस्मिन्नर्थेश्रुतिंप्रमाणयति अजामिति अजामेकांलोहितशुक्लकृ
ष्णांबह्वीःप्रजाःसृजमानांस्वरूपामित्यादिश्रुतेः नानाजीवगतनिकृष्टांतःकरणव्यष्ट्युपाध्युपेतयासम

यावृक्षाणांसमष्ट्यभिप्रायेणवनमित्येकत्वव्यपदेशः यथावाजलानांसमष्ट्यभिप्रायेणजला
शयइतितथानानात्वेनप्रतिभासमानानांजीवगताज्ञानानांसमष्ट्यभिप्रायेणतदेकत्वव्यपदेशः
अजामेकामितिश्रुतेः इयंसमष्टिरुत्कृष्टोपाधितयाविशुद्धसत्त्वप्रधाना एतदुपहितंचैतन्यं
सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकम

ष्ट्युपाधेरस्यवैलक्षण्यंदर्शयति इयमिति वि
गतरागादिदोषसकलकार्यप्रपंचसृजनकारणभूतस्याज्ञानस्यसमष्टिभूतोत्कृष्टोपाधित्वेनविशु
द्धसत्त्वप्राधान्यमितिभावः एतत्समष्ट्युपाधिद्वारेणईश्वरचैतन्यंलक्षयति एतदुपहितंचैतन्यमि
ति एतत्समष्ट्यज्ञानोपलक्षितंचैतन्यंसर्वस्यचराचरात्मकप्रपंचस्यसाक्षित्वेनसर्वज्ञइत्युच्यते
सर्वेषांजीवानांकर्मानुरूपेणतत्तत्फलदातृत्वेनेश्वरइत्युच्यते तथासर्वेषांजीवानामंतर्हृदयेस्थि

मित्युच्यते सर्वस्य चराचरात्मकप्रपंचस्य विवर्ताधिष्ठानत्वेन जगत्कारणमिति व्यपदिश्यत इत्यर्थः उक्तेर्थे युक्ति
माह सकलेति अत्र प्रमाणमाह यइति इदानीं तस्यैवेश्वरस्य समष्ट्युपाधेरेव कारणशरीरत्वमानंदमयको
शत्वं सुषुप्त्यवस्थाविशिष्टत्वं च लभत इत्याह ईश्वरस्येति कारणशरीरत्वे हेतुमाह अखिलेति आनंदमयत्वे हेतुमा
ह आनंदप्रचुरत्वादिति कारणत्वावस्थायां प्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलसूक्ष्मकार्यप्रपंचस्यैवाभा
वात्तद्बाहुल्यमिति कोशत्वे युक्तिमाह आच्छादकत्वादिति शरीराच्छादकचर्मवदात्माच्छादकत्वादज्ञानसो

व्यक्तमंतर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् यः सर्वज्ञः सर्ववि
दिति श्रुतेः ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानं
दमयः कोशः सर्वोपरमत्वात्सुषुप्तिः अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते ॥ ॥ ॥

वकोश इति व्यवहारः ननु तथापि कारणतोपाधेस्तस्य सुषुप्तित्वं कुत इत्यत आह सर्वोपरमत्वादिति सर्वस्य
स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात्सुषुप्तित्वमित्यर्थः ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमि
त्याशंक्य सत्त्वाभेद इत्याह अत एवेति यतः कारणं सुषुप्तिरत एव पंचीकृतभूतकार्यस्य स्थूलप्रपंचस्य जाग्रद
वस्थाविशिष्टस्यापंचीकृतभूतकार्यस्य सूक्ष्मप्रपंचस्य स्वप्नप्रपंचविशिष्टस्य लयस्थानमित्यपि व्यवह्रियत इत्य
र्थः ॥ ॥ ॥ ॥ ॥

समष्टिरूपाज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिभूतमज्ञानं निरूपयितुं दृष्टांतौ दर्शयति यथा वनस्येति
यथा बहुवृक्षसमुदायस्य वनत्वेन रूपेणैकत्वव्यवहारेपि प्रत्येकविवक्षया चूतादयो बहवो वृक्षाः
तिष्ठंतीति बहुत्वव्यवहारः यथा वा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारे
पि प्रत्येकवाप्यादिविवक्षया बहूनि जलानि तिष्ठंतीति बहुत्वव्यवहारः तथा सकलप्रपंचकारणस्याज्ञा
नस्य समुदायरूपेणैकत्वेपि अहंकारादिकारणीभूतानां तत्तज्जीवगतानामज्ञानानां प्रत्येकविवक्षया बहुत्वव्यव

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जला
नीत्यनेकत्वव्यपदेशः तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः इंद्रो मायाभिः पुरुरूप ई
यत इति श्रुतेः अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः इयं व्यष्टिर्निकृष्टोपाधितया म

हार इत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति इंद्र इति ननु तथाप्येकस्यैवाज्ञानस्य त लिनसत्वप्रधाना
द्वित्वं चैतन्यस्य च व्यष्टिसमष्टिता कुत इत्यत आह अत्रेति भेदविवक्षया व्यष्टित्वं समुदायादिवत् अ
भेदविवक्षया च समष्टित्वं वनादिवदित्यर्थः तत्र महाप्रलयकालीनसमष्टिरूपाधिभूतविशुद्धसत्वप्रधा
नाया मूलप्रकृतेः सकाशात् दैनंदिनप्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रकृतेर्भेदं दर्शयति इयं व्यष्टि
रिति इयं जीवगतानामष्टप्रव्यष्ट्यापन्नाहंकारादिविक्षेपसंस्कारादिरूपा निकृष्टोपाधितेन मलिनसत्वप्रधाने

वे.सा.र. ८

न्त्यर्थः अनेनाभिधानात्तच्चैतन्यं लक्षयति एतदुपहितमिति अत्रोपपत्तिमाह एकेति ईश्वरगतमूलाज्ञानस्य जीव
गताहंकारादिचित्तेषु संस्कारादिरूपाज्ञानस्य वस्तुत एकत्वेन तदवभासकेश्वरजीवचैतन्ययोरप्येकत्वमित्यर्थः
सौषुप्तजीवचैतन्यस्य प्राज्ञत्वं साधयति अस्येति संस्काररूपास्पष्टोपाधितयानवद्भूतत्वेनानतिप्रकाशकत्वस्वभा
वात्प्राज्ञत्वमस्येत्यर्थः यथा जगत्कारणस्येश्वरोपाधेः कारणशरीरत्वमानन्दप्रचुरत्वेनानन्दमयत्वं कोशाच्छादकत्वेन
च कोशत्वं तथैतत्सर्वं तारतम्येन प्राज्ञचैतन्यस्यापीति दिशति अहंकारादीति प्रलयकाले हिरण्यगर्भादिप्रपंचोत्पा

एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते एकाज्ञानावभासकत्वात् अस्य प्राज्ञत्वमस्
पष्टोपाधितयानतिप्रकाशकत्वात् अस्यापीयं व्यष्टिः अहंकारादिकारणत्वात्कारणशरीरमानन्दप्रचुरत्वा
त्कोशवदाच्छादकत्वादेव हेतोरानन्दमयः कोशः ॥ ॥

दकेश्वरगतमूलप्रकृतिवत्सुषुप्तिकालेऽहंकारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि
कारणशरीरत्वं इंद्रियतद्विषयाभावेनव्याकुलताभावादानन्दबाहुल्यादानन्दमयत्वं कोशवदात्माच्छादकत्वात्को
शत्वं च युक्तमिति भावः ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशंक्य पूर्ववत्संज्ञाभे
देनवस्तुभेद इति वक्तुं तत्र युक्तिमाह ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ रामः ८

सर्वोपरमत्वादिति पंचीकृतस्थूलशरीरस्य व्यावहारिकस्य अपंचीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविला-
पितत्वात् तस्यापि प्रातिभासिकस्य स्वाप्नप्रपंचस्य स्वकारणेऽज्ञाने लीनत्वात् सर्वोपरतिरित्यर्थः तथा चोक्तं
लये फेनस्य तद्धर्मा द्रवाद्याः स्युः तरंगके तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा व्यावहारिके जीवस्थूल-
यस्य प्रातिभासिके तल्लये सच्चिदानंदाः पर्यवस्यन्ति साक्षिणीति ननु प्रलयकाले सुषुप्तिकाले चांत-
तःकरणतद्वृत्त्यभावेनानंदग्राहकाभावादानंदस्य तुर्यसद्भावे प्रमाणाभावमाशंक्य परिहरति तदानी-
मिति यथा सूक्ष्मत्वेनांतःकरणस्य वृत्तिरंगीक्रियते तथा चैतन्यदीप्ताभिस्तस्यापि सूक्ष्माभिर्वृत्तयः स्वी-
सर्वोपरमत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते तदानीमेतावीक्षणा-
नो चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिर्ज्ञानवृत्तिभिरानंदमनुभवतः आनंदभुक् चेतोमुखः आनंदमा-
क्रियंते तथा चेयमर्थः स्वकीयाज्ञानवृत्तिभिः स्वात्मानंदं स्वाद्वतुल्यमनुभवति जीवोपि म प्रियंतेः ॥
कारमात्रावशिष्टातिप्रशांताज्ञानवृत्तिभिः स्वात्मानंदं स्वादुकूलतारतम्येनानुभवतीति भावः श्रुतेश्चोपष्टंभकत्वे-
न श्रुतिमवतारयति आनंदभुगिति अस्यार्थः आनंदो विक्षेपाभावो फलं तिन आत्मानमेव भुंक्ते ज्ञान-
वृत्तिभिरवगच्छतीत्यानंदभुक् चेतः आत्मस्वरूपावबोधः स एवावरणशक्तिसहितो मुखं यस्य स चेतोमुखः
प्राज्ञः प्रकृष्टस्वयंप्रकाशआनंदात्मनि अज्ञानवृत्तिरूपो बोधो यस्य स प्राज्ञः उक्ता ॥ ॥

वे॰सा॰ टी॰ ९ वस्थात्रयाभावेनावगम्यमानात्तृतीयः उत्तरकालीनसुखस्वापपरामर्शोपपत्तिरपि पूर्वानुभूतसुखस्मृत्युत्पत्त्यानु
भवसद्भावे प्रमाणमित्याह सुखमहमिति सुखमहमस्वाप्समित्यानंदपरामर्शः न किंचिदवेदिषमित्यज्ञानप
रामर्शः तथा च सुषुप्तिदशायां प्रलयकाले च प्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवत एवेत्यर्थः तदनयोरी
श्वरगतमलाज्ञानस्य जीवगतसंस्कारमात्रावशिष्टाज्ञानस्य च समष्टिव्यष्ट्युपाधिप्रायेणाभेदभानेऽपि वस्तुतो भे
दोऽनास्तीत्येतत्सदृष्टांतमाह अनयोरिति एकोपाधिद्वयद्वारेणेश्वरप्राज्ञयोरप्यभेदं दृष्टांतमुखेन दर्शयति

सुखमहमस्वाप्सं न किंचिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च अनयोः समष्टिव्यष्ट्योर्वनवृ
क्षयोरिव जलाशयजलयोरिव वाभेदः एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाका
शयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिव वाभेदः एष सर्वेश्वर इत्यादिश्रुतेः ॥ ॥

एतदुपहितयोरिति ईश्वरस्य वनावच्छिन्नाकाशवत्प्राज्ञस्य वृक्षावच्छिन्नाकाशवच्च तथा स्थूलजलाशयो
पाध्यवच्छिन्नाकाशवत् जलगतप्रतिबिंबाकाशवच्च कारणोपाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञ
स्य च वस्तुतोऽभेद एवेत्यर्थः तत्र प्रमाणमाह एषेति तथा चोक्तमाचार्यैः कार्योपाधिरयं जीवः कारणोपाधि
रीश्वरः कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते इति उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ तत्प्रपंचनिष्प्रदर्शौ राम॰
अनवच्छिन्नं तुर्यचैतन्यं तल्लक्षयति वनवृक्षतदवच्छिन्नाकाशयोरिति ॥ ॥ ॥ ९

यथा स्थूलघटोपाध्यवच्छिन्नाकाशापेक्षया सूक्ष्मघटोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य
तदुभयाधारत्वात् अनवच्छिन्नत्वात् महत्त्वं तथा कार्यकारणोपाधितदवच्छिन्नचैतन्यद्वयापेक्षया
तदाधारभूतस्य तदनवच्छिन्नस्य सर्वव्यापिचैतन्यस्य विशुद्धतत्तुरीयमित्युच्यत इत्यर्थः । अस्य चैतन्यस्य तुरीय
त्ववक्ष्यमाणविश्वाद्यपेक्षयेति द्रष्टव्यं अस्मिन्नर्थे श्रुतिं संवादयति शिवमिति आदिपदात् त्रिपुटा
भासस्य पञ्चकोशभोक्तृभोगाश्रयदृश्येभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवस्तस्मादिति श्रुतेः सङ्ग्रहः
वत्तत्तदवच्छिन्नाकाशयोर्लाघवगौरवगतप्रतिबिम्बाकाशयोर्वा आधारत्वादनुपहितमहाका
शवत् तयोः स्थूलसूक्ष्मदेहयोः तदुपहितचैतन्ययोराधारभूतं तदनुपहितचैतन्यं तुरीयमि
त्युच्यते शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स आत्मा इति श्रुतेः इदमेव तत्तुरीयं शुद्धचैतन्यमज्ञानततु ॥
आरोपेणाध्यारोपाख्येन तथा प्रकरणार्थविस्मरणं माभूदिति प्रसङ्गात् तस्मात् एतदेव विशुद्धचैत
न्यं तदेव पूर्वोक्तचैतन्यद्वयेन सहैकत्वं त्रितयाणां महावाक्यस्य वाच्यार्थं लभते भेदविवक्षायां वल लक्षणं ल
भतस्तस्माद् इदमिति त्रयाणां चैतन्यानां चैतन्येनैकरूपेणैकत्वेऽपि अवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यल
क्ष्यत्वेऽसंभवतीति भावः अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं ॥ ॥ ॥

वे॰सा॰ टी॰ १०

क्तैकरसप्रकाशस्यैकस्यैवासंगोदासीनस्यात्मन आकाशादिप्रपंचजनकत्वमित्येतन्मतविरोधपरिहारायाज्ञा
नस्य शक्तिद्वयं निरूप्यते अस्येति तदेवत्नात्मतो तिदिशति आवरणशक्तिस्तावत् सच्चिदानंदस्वरूपमावृ
णोतीत्यावरणशक्तिः ब्रह्मादिस्थावरान्तं तत्र गगनलवृद्धद्रव्यत्नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्ति
रिति शक्तिद्वयमज्ञानस्येत्यर्थः ननु परिच्छिन्नस्य स्वप्रकाशाविद्रूपाद्वैतपरिपूर्णस्वरूपस्यात्मनः परिच्छि

पहितत्वेनत्वाभ्यांतरायः पिंडवद्विविक्तं सन्महावाक्यमवाच्यं विविक्तं सल्लक्षणमिति चोच्यते अस्या
ज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं आवरणशक्तिः तावदल्पोपि मेघोऽनेकयोजनायत =
मादित्यमंडलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मा,
नमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपथपिधायकतयाच्छादयतीवेति तादृशं सामर्थ्यम्

तेनाल्पत्वेन तन्मोरूपेणाच्छादकेनाज्ञानशक्तिविशेषेणाकथमावरणमित्याशंक्याह अल्पेनाज्ञानस्यात्माच्छाद
कत्वाभावेपि प्रमातृबुद्धिमात्रावच्छादकत्वेनाज्ञानस्यात्माच्छादकत्वमुपचाराद्युक्तमित्याह आवरणशक्ति वि
ति यथाल्पोपि मेघोऽनेकयोजनविस्तीर्णमादित्यमंडलमवलोकयितृपुरुषदृष्टिमात्राच्छादकत्वेनादित्यमा
च्छादयतीत्युपचाराद्गुच्यते तथा श्रुतितत्त्वेऽपरिच्छिन्नमप्यज्ञानं अपरिच्छिन्नमात्मानं द्रष्टृप्रमातृबुद्धिमात्राच्छाद

अस्मिन्नर्थे वृद्धसंमतिमाह तदुक्तमिति अनयैवावरणशक्त्यावच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुः
खमोहात्मकतुच्छसंसारसंभावनापि संभाव्यतइत्याह अनयेति इयमेवावरणशक्तिरात्मनो भेदबुद्धिजन
कत्वेन संसारहेतुरिति भावः अत्रानुरूपं दृष्टांतमाह यथा स्वाज्ञानेनेति यदुक्तमसंगोदासीनस्यात्मनः
कथं जगत्कारणत्वमिति तन्निराकर्तुं विक्षेपशक्तिस्वरूपमाह विक्षेपशक्तिस्त्विति यथा रज्जुविषय
कमज्ञानं सर्पं समुत्पादयति तथात्मविषयकमज्ञानमपि स्वावच्छिन्ने आत्मनि विक्षेपशक्तिप्रभावेनाका

तदुक्तं घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मेति अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसं
सारसंभावनापि संभाव्यते यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसंभावना विक्षेपशक्तिस्तु यथा रज्ज्व
ज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याका
शादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यं तदुक्तं विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति

शादिकं प्रपंचमुद्भावयतीत्यर्थः अस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति तदुक्तमिति ननु किमात्मा चराच
रात्मकप्रपंचस्य निमित्तकारणमुपादानकारणं वा नाद्यः दृगादिवत्स्वकार्यव्यापित्वं न स्यादात्मनः तत्सृष्ट्वा तदे
वानुप्राविशदिति श्रुत्या स्वकार्यव्यापित्वश्रवणात् न द्वितीयः अचेतनस्य जडस्य प्रपंचस्य चेतनस्योपादानक
त्वासंभवात् उपादानत्वेन च कार्यकारणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्वप्रसंगादनित्यत्वं न स्यादित्या

चैतन्यप्राधान्येननिमित्तत्वंस्वोपाधिप्राधान्येनोपादानत्वंचसंभवतीत्याह शक्तिद्वयवदिति यथायस्कांतसन्नि
धानेनअयस्मयलोहचेष्टने तथा चैतन्यसन्निधानेनअयस्मज्ञानचेष्टनेऽप्यज्ञानविकारंप्रति चैतन्यस्यनिमित्तत्वंआका
काशादिकार्यंप्रतिमायायाः साक्षादुपादानत्वेनमायाविनईश्वरस्यापि परंपरयोपपत्तावुपादानत्वेनविरुध्यत
इत्यर्थः यदुक्तंचैतन्यस्यनिमित्तकारणत्वेकार्यानुप्रवेशोनस्यादितितन्न कारणस्यकार्यानुप्रवेशनियमस्यो
पादानकारणविषयत्वेननिमित्तकारणविषयत्वाभावात्तत्सृष्ट्वेत्यादिश्रुतेरप्युपादानकारणपरत्वात्‌यद
प्युक्तं आत्मनउपादानकारणत्वेप्रपंचस्यानित्यत्वंनस्यादिति तदपिन तस्यपरिणामविषयत्वेनविवर्त्तवि

शक्तिद्वयवदज्ञानोपहितंचैतन्यंस्वप्रधानतयानिमित्तंस्वोपाधिप्राधान्यतयोपादानंचभवति ॥

षयत्वाभावात्प्रपंचस्यब्रह्मविवर्त्तत्वात् विवर्त्तत्वंचस्वस्वरूपापरित्यागेनस्वरूपांतरप्रदर्शकत्वं यथारज्ज्वव
छिन्नचैतन्यनिष्ठाज्ञानस्यरज्जुस्वरूपापरित्यागेनसर्पादिस्वरूपांतरप्रदर्शकत्वंतथेश्वरचैतन्यनिष्ठाज्ञानस्या
केरपिचैतन्यस्वरूपापरित्यागेन आकाशादिस्वरूपांतराकारेणप्रदर्शकत्वंतावताकाशादिप्रपंचस्यानित्य
त्वंनसंभवति अज्ञानस्यमिथ्यारूपत्वेनतज्जन्यस्याकाशादिप्रपंचस्यापिमिथ्यात्वंनचैवमज्ञानस्यमिथ्यात्वेन
तत्कृतबंधमोक्षयोरपिमिथ्यात्वप्रसंगइतिवाच्यंइष्टापत्तेः ॥ ॥ ॥ ॥

तदुक्तं भागवते बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनमिति
अलमतिविस्तरेण एकस्यैवात्मनो निमित्तोपादानकारणत्वे दृष्टान्तमाह यथालूतातंत्विति यथालूतातंतुः
स्वात्मघ्रमानंतेन लत्ताणाकार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं चैतन्यसंनिधानव्यतिरेकेणतदस्य देहस्य
स्तशरीरवत्तत्जनकतासंभवात्स्वशरीरप्राधान्येनोपादानं च भवति अशरीरस्य साक्षात्तेन तज्जनकतासंभ

यथालूतातंतुः स्वकार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं स्वशरीरप्र
धानतयोपादानं च भवति ॥ ॥ ॥ ॥ ॥

वात्स्वशरीरप्राधान्येनोपादानं च भवति शरीरस्य साक्षात्तंतूपादानत्वेन तदवच्छिन्नचैतन्यस्याप्युपादानत्वेनो
पचारात् एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं मायोपाधिप्रधानतयोपादानत्वं च भवतीत्यर्थः इदा
नीं विवेप ॥ ॥ ॥

वे॰सा॰ टी॰ २२ शक्तिकृत्यमाह तमविति आकाशादेरेतद्वात्तमोगुणप्रधानविक्षेपशक्तिमज्ञानावच्छिन्नचैतन्यस्यैवाकाशादिप्रपं
चजनकत्वमितिभावः अस्मिन्नर्थे श्रुतिं प्रमाणयति तस्माद्वा एतस्मादात्मनइति एतेनार्थात्सांख्यनैय्यायिकप
क्षौ निरस्तौ शक्तेरज्ञानस्य शक्तिमत्परतंत्रत्वात्स्वतंत्रस्य तस्य केवलस्य जडस्याज्ञानस्य जगत्कारणत्वानुपपत्तेः
ईक्षतेर्नाशब्दं रचनानुपपत्तेश्च नानुमानमित्यादिन्यायैर्निरस्तत्वाच्च परमाणोरप्युक्तदोषग्रासत्वासान्नपाया
त् अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च यतोवाइमानिभूतानिजायंतेयेनजातानि

तमः प्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः
पृथिवीचोत्पद्यते तस्माद्वा एतस्मादात्मन आकाशः संभूतइत्यादिश्रुतेः तेषुजाड्याधिक्यदर्शनात्तमः
प्राधान्यं तत्कारणस्य ॥ ॥ ॥ ॥

जीवंति यत्प्रयंत्यभिसंविशंति सदेव सोम्येदमग्र आसीत् एतस्माज्जायते प्राणः मनः सर्वेंद्रियाणि च अ
हं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते बीजं मां सर्वभूतानामित्यादिश्रुतिस्मृतिभिरीश्वरस्यैव जगत्कारणत्वप्रति
पादनात् तत्त्वाकाशादिप्रपंचोत्पादकचैतन्यावच्छेदकाज्ञाने कुतः तमः प्राधान्यमित्याशंक्याह तेष्विति कार
णगुणा हि कार्यगुणानारभंत इति न्यायादितिभावः ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणमात्रप्राधा राम॰ २२
न्येनाकाशादिजनकत्वमित्याशंक्याह ॥ ॥

तदानीमिति तदानीमस्मिन्निवेलायां सत्वादयः त्रयोपि गुणाः तारतम्येन कारणप्रक्रमन्यायेन तेषामाका्शा-
दिषु पंचभूतेषूत्तरोत्तराधिक्येनत्पाद्यंत इत्यर्थः इमान्येव सूक्ष्मशरीरादिकारणभूतान्यपंचीकृतानि सूक्ष्म-
रूपतन्मात्राणीत्युच्यंते इत्याह एतान्येवेति तदुक्तं पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं अपंचीकृतभूतो-
त्थं सूक्ष्मांगं भोगसाधनमिति वचनादपंचीकृतभूतेभ्यो पंचीकृतसूक्ष्मशरीराणि पंचीकृतस्थूलभूतेभ्यः

तदानीं सत्वरजस्तमांसि कारणगुणप्रक्रमेण तेषामाकाशादिषूत्पद्यंते एतान्येव सूक्ष्मभूतानि तन्मा-
त्राण्यपंचीकृतानि चोच्यंते एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते सूक्ष्मशरीराणि सप्तदशा-
वयवानि लिंगशरीराणि अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति

स्थूलशरीराणि चोत्पद्यंते इत्याह एतेभ्य इति सूक्ष्मशरीरस्वरूपभूतानवयवानाह अवयवास्त्विति ज्ञानेंद्रि-
याणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते सात्विकांशाद्वायोः त्वगिंद्रियं सा-
त्विकांशात्तेजसः चक्षुः सात्विकांशाज्जलाज्जिह्वा सात्विकांशाद्याः पृथिव्याः सकाशात् घ्राणेंद्रियं चेति क्रमेणोत्प-
द्यते इत्याह एतानीति बुद्धिलक्षणमाह । ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥

वे.सा. बुद्धिरिति ब्रह्मैवाहमिति निश्चयात्मिकैवांतःकरणवृत्तिरेव बुद्धिरित्यर्थः मनसो लक्षणमाह मनो नामेति अहं
टी. चिद्रूपो देहो वेति संशयात्मिकांतःकरणवृत्तिरेव मन इत्यर्थः स्मरणात्मकचित्तस्य गर्वात्मकाहंकारस्य च बुद्धिम
२२ नसोरंतर्भावमाह अनयोरेवेति यद्यप्यंतःकरणेन चतुर्णामेकत्वं तथाप्येकस्यैव पुरुषस्य पाचकः पाठक
इत्यादिवृत्तिभेदाद्भेदवदेकस्याप्यंतःकरणस्य निश्चयसंशयस्मरणाहंकारविषयभेदैर्बुद्ध्यादिभेद इत्यर्थः बुद्ध्या

13

एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते बुद्धिर्नाम निश्चयात्मिकांतःक
रणवृत्तिः मनो नाम संकल्पविकल्पात्मिकांतःकरणवृत्तिः अनयोरेव चित्ताहंकारयोरंतर्भावः एते
पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो बुद्ध्याद्युत्पद्यंते एतेषां प्रकाशात्मकत्वात्सात्त्विकांश
कार्यत्वम् इयं बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञानमयकोशो भवति ॥ ॥ ॥ ॥

दीनामुत्पत्तिप्रकारं दर्शयति एते पुनरिति एतेषां चतुर्णां सात्त्विकांशेभ्यो भूतेभ्य उत्पत्तौ निमित्तमाह एतेषा
मिति बुद्ध्यादीनां प्रकाशात्मकत्वात्सात्त्विकांशभूतकार्यत्वमित्यर्थः बुद्धेर्विज्ञानमयकोशत्वं दर्शयति इयमिति बु
द्धेः सत्त्वकार्यत्वाज्ज्ञानेंद्रियसाहित्येन प्रकाशाधिक्याद्विज्ञानमयत्वं आत्माच्छादकत्वाच्च कोशत्वमित्यर्थः विशुद्धब्र राम.
ह्मप्रतिबिंबितचिदात्मनो जीवत्वं दर्शयति ॥ ॥ २२

अयमिति तत्प्रायः पिंडवदुपचारोपितं चैतन्यं वस्तुतोकर्तृभोक्तृस्वभावं देहापरिच्छिन्नमक्रियमपि भोक्तृत्वकर्तृत्वसुखि
त्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलोकान्तरगामित्वं व्यावहारिकजीवत्वं च लभत इत्यर्थः मनो
मयकोशत्वं निरूपयति मनस्त्विति सत्त्वगुणप्रधानं मनः सत्त्वगुणांशेभ्यो जातैः श्रोत्रादिज्ञानेन्द्रियैरेव सहितं सन्म
नोमयकोश इत्यर्थः अत्र तु मनसः सत्त्वोपहितरजोविकारेच्छारूपत्वात्संकल्पविकल्पात्मकत्वेन बुद्ध्यपेक्षयाज्ञाना

अयमात्माकर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्य
ते मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि एता
नि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यते ॥ ॥ ॥ ॥

धिकात् मनोमयत्वं आत्माच्छादकत्वात्कोशत्वमिति भावः कर्मेन्द्रियाण्युपदिशति कर्मेन्द्रियाणीति एतेषामुत्प
त्तिसाधनतापेक्षायामाह एतानि पुनरिति भूतानां त्रिगुणात्मकत्वेपि रजोगुणबाहुल्येभ्यो व्यस्तभूतेभ्यो वागादीनि पृथक्पृथ
क्क्रमेणोत्पद्यन्ते रजोगुणप्रधानादाकाशाद्वागिन्द्रियमुत्पद्यते रजोगुणप्रधानाद्वायोः पाणीन्द्रियं रजोगुणप्रधानाद
ग्नेः पादेन्द्रियं रजोगुणप्रधानाज्जलाच्छिश्नेन्द्रियं रजोगुणप्रधानायाः पृथिव्याः पायुरिन्द्रियमुत्पद्यत इत्यर्थः ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥

वे·सा· वायूस्तान्दिशति वायवइति तयोरेषां प्राणस्य लक्षणमाह प्राणो नामेति ऊर्द्ध्वगमनशीलो नासाग्रस्थायी वा-
टी· युः प्राण इत्यर्थः अपानस्य लक्षणमाह अपानो नामेति अधोगमनशीलः पाय्वादिस्थायी वायुरपान इत्यर्थः
१४ व्यानस्य लक्षणमाह व्यानो नामेति सर्वनाडीगमनशाली अखिलशरीरस्थायी वायुर्व्यान इत्यर्थः उदानस्य लक्षण-

15

वायवः प्राणापानव्यानोदानसमानाः प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्त्ती अपानो नामावाग्गमन-
वान् पाय्वादिस्थानवर्त्ती व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती उदानो नाम कंठस्थानीय ऊ-
र्ध्वगमनवानुत्क्रमणवायुः समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः केचित्तु नागकूर्म=
कृकलदेवदत्तधनंजयाख्याः पंचान्येपि वायवः संतीति वदंति नाग उद्गिरणकरः कूर्म उन्मीलनकरः कृक-
लः क्षुत्करः देवदत्तो विजृंभणकरः धनंजयः पोषणकरः तथा चोक्तं उद्गारे नाग आख्यातः कूर्म उन्मी-
लने स्मृतः कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृंभणे न जहाति मृतं चापि सर्वव्यापी धनंजः

माह उदानो नामेति ऊर्ध्वमुत्क्रमणशीलः कंठस्थायी वायुरुदान इत्यर्थः समानस्य लक्षणमाह समानो नामेति श-
रीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः प्राणादीनां वायुत्वेनैकरूपत्वेपि क्रियाभेदेन भेद इत्यर्थः कपिल
मतानुसारिणः क्रियाभेदेनान्येपि पंच वायवः संतीति वदंतीत्याह केचित्त्विति तेषामेव नामानि निर्दिशति ना- राम·
गेत्यादिना वदंति न तु नागादीनां प्राणादिष्वंतर्भावं वदंतीत्याह ॥ ॥ ॥ १४

एतेषां प्राणादिष्विति प्राणादिवायूनां मुख्यत्वेनोक्तानां गुणापेक्षायामाह एतदिति अपंचीकृतपंचमहाभूतेभ्यो रजःप्र
धानेभ्यः प्राणादयो जायन्त इत्यर्थः एतेषां प्राणादीनां प्राणमयत्वात् प्राणमयं तं आत्माच्छादकत्वात् कोशत्वं च भवती
त्याह इदमिति प्राणादीनां रजःप्रधानभूतकार्यत्वे निमित्तमाह अस्येति प्राणादीनां क्रियात्मकत्वाद्रजःकार्यत्व

एतेषां प्राणादिषु न भेदो वा प्राणादयः पंचैवेति केचित् एतत्प्राणादिपंचकमाकाशादिगतरजोंशेभ्यो मि
लितेभ्य उत्पद्यते इदं प्राणादिपंचकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति अस्य क्रियात्मकत्वेन रजोंश
कार्यत्वं एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः मनोमय इच्छाशक्तिमान् करणरूपः प्राण
मयः क्रियाशक्तिमान् कार्यरूपः योग्यत्वादेवमेतेषां विभाग इति वर्णयंति एतत्कोशत्रयं मिलितं सत् सूक्ष्म
शरीरमित्युच्यते ॥ ॥

मित्यर्थः एतेषु पंचसु कोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन क
रणक्रियारूपत्वं दर्शयति एतेष्विति तत्र हेतुमाह योग्यत्वादिति इदमेव कोशत्रयं सूक्ष्मशरीरमिति व्यवह्रिय
त इत्याह एतदिति ॥ ॥ ॥ ॥

वे॰सा॰ टी॰ १५ अस्य समष्टित्वे हेतुमाह अत्रापीति एकबुद्धीति चराचरप्राणिमात्रस्य यावंत्यनंतानि सूक्ष्मशरीराणि तेषां सर्वेषां सू
क्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन तस्यैकबुद्ध्या विषयीकृतत्वात्समष्टित्वमित्यर्थः तत्र दृष्टांतमाह वनवदित्या
दि अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्शयति अनेकेति अनेकेषां जीवानां प्रत्येकं स्वस्वलिंगशरीरस्य स्वस्वबुद्धिविषय
15 त्वेनानेकबुद्धिविषयतया व्यष्टित्वमित्यर्थः तत्र दृष्टांतमाह वृक्षवदित्यादि उक्तसमष्ट्यवच्छिन्नचैतन्यस्य सूत्रात्मत्वादिसं
ज्ञां दर्शयति एतदिति तत्र हेतुमाह सर्वत्रानुस्यूतत्वादिति सर्वप्राणिलिंगशरीरेष्वनुस्यूतत्वात् विद्यमानत्वादित्यर्थः

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः अनेकबुद्धिविषयतया वृक्षवज्जल
वद्वा व्यष्टिरपि भवति एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छा
क्रियाशक्तिमदुपहितत्वादपंचीकृतपंचमहाभूताभिमानित्वाच्च अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्म
त्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः अत एव स्थूलप्रपंचलयस्थानमित्युच्यते

हेत्वंतरमाह ज्ञानेच्छेति ज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वात् विज्ञानमयादिकोशत्रयस्य सूक्ष्मशरीरत्वं
दर्शयति अस्यैषेति अस्य सूत्रात्मनो हिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरं अस्य स्थूलप्रपंचापेक्षया सूक्ष्म
त्वादित्यर्थः अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाह जाग्रदिति विराड्रूपेणानुभूतस्थूलप्रपंचविष
यवासनामयत्वात्स्वप्नमस्येत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ राम॰ १५

यतः समष्टेः सूक्ष्मत्वं च समष्टेरेव स्थूलप्रपञ्चलयस्थानमित्युच्यते विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिरण्यगर्भत्वं
प्रतिपाद्येदानीं तद्व्यष्टिरूपं लिङ्गं तच्चैतन्यस्य तैजसत्वं निरूपयति एतदिति अत्र हेतुमाह तेजोमयेति व्यष्टिरूपविज्ञा-
नमयादिकोशत्रयं तेजः समष्ट्यपेक्षया सूक्ष्मशरीरमिति दर्शयति अस्यापीति सूक्ष्मशरीरत्वे हेतुमाह स्थूलेति अस्यापि
स्वप्ने हेतुमाह जाग्रदिति विश्वं चैतन्यं अनुभूतस्थूलशरीरविषयवासनामयत्वात्स्वप्नमित्यर्थः अस्यैव सूक्ष्मशरीरस्य
स्थूलशरीरलयस्थानत्वे युक्तिमाह अत एवेति यथा पूर्वं प्रोक्तैस्त्रयात्मज्ञानवृत्तिभिः स्वप्नावस्थायामानन्दमनुभ
एतद्व्यष्टिरूपं इदं तच्चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् अस्यापीयं व्यष्टिः स्थूलशरीरा-
पेक्षया सूक्ष्मत्वादिति हेतोः सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः अत एव
जाग्रद्वासनामयत्वात्स्थूलशरीरप्रपञ्चलयस्थानमिति चोच्यते एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः
सूक्ष्मविषयाननुभवत इति प्रविविक्तभुक् तैजस इत्यादि श्रुतेः ॥ ॥
भवतः तथा हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान्सूक्ष्मादिविषयाननुभवत इति
दर्शयति एताविति अस्मिन्नर्थे श्रुतिमुदाहरति प्रविविक्तेति प्रविविक्तं भुंक्त इति प्रविविक्तभुक् तैजस तेनान्तः
करणकार्यत्वाभावेन परिणतेन देवस्थूलशरीरादिहीनत्वसमस्तैजसः तेजोन्तकरणाभिमानीत्यर्थः इदानीं विज्ञा-
नमयादिकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदवच्छिन्न
तैजसचैतन्यस्य च वनवृक्षावच्छिन्नाकाशादिदृष्टान्तमुखेनाभेदं दर्शयति ॥ ॥ ॥

वे.सा. अत्रापीति समष्टिव्यष्ट्योरपि वनवृक्षजलाशयजलवच्चाभेदः उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि व
र. नवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहर
९९ ति एवमिति अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितुमुपक्रमते स्थूलभूतानीति तन्मात्राद्यः पूर्वस्मादुद्देशमंयोत
16 यति पंचीकृतानीति अपंचीकृतसूक्ष्मभूतापेक्षया स्थूलभूतानि पंचीकृतानीत्यर्थः पंचीकरणमेव प्रतिपादयि
तुं प्रतिजानीते पंचीकरणं त्विति पंचीकरणप्रकारमेवाह आकाशादीति अयमर्थः सृष्टिकाले सकलप्राणि

अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्
गतप्रतिबिंबाकाशवच्चाभेदः एवं सूक्ष्मशरीरोत्पत्तिः स्थूलभूतानि तु पंचीकृतानि पंचीकरणं त्वाकाशा
दिपंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पंच भागान्प्रत्येकं चतुर्धा समं विभज्य
तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागांतरेषु योजनं तदुक्तं ॥ ॥ ॥

दृष्टवशाच्छरीरप्रेरणयाकाशादिभूतेनोत्पन्नानानायुक्तियासहायभूतात्परमात्मनः सकाशादुत्पन्नसूक्ष्म
तानि तान्यपंचीकृतानि पंचीकृतानि भवंति तानि च प्रत्येकं द्वैविध्यमापद्यंते तेष्वाकाशादिषु दशसु भागेषु प्रा
थमिकान्पंच भागान्प्रत्येकं चतुर्धा समं विभज्य स्वार्धभागपरित्यागेन चतुर्णां प्रत्येकं भागांतरेषु सत्सु ते एव पंची
कृतानि स्थूलानि भवंतीति अस्मिन्नर्थे वृद्धसंमतिमाह ॥ ॥ ॥ ॥ राम.
तस्मादिष्टव्यवहारासमर्थानीति कृत्वा तदीयसंस्थौल्यापेक्षायां अदृष्टवशात्प्राणिज्ञातधर्माधर्मापेक्षेश्वरोऽपेक्षितान्येव भूतानि २ ९९

द्वियेति पंचीकरणस्य त्रिवृत्करणप्रतिपादकश्रुत्यंतरविरोधमाशंक्य परिहरति अस्याप्रामाण्यमि
ति सृष्टिश्रुतौ सृष्टिप्रविवरणार्थमनात्रश्रुतमपि भूतद्वयमाश्रित्य भूतपंचकाभिप्रायेण भूतत्रयसृष्टिप्र
तिपादनाद विरोध इत्यर्थः आकाशादीनां पंचभूतानां चतुर्धा विभक्तानामन्योन्यप्रत्येकानुप्रवेशेन पंची

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात् पंच पंच ते इति अस्याप्रा
माण्यं नाशंकनीयं त्रिवृत्करणमिति श्रुतेः पंचीकरणस्याप्युपलक्षणत्वात् पंचानां पंचात्मक
त्वे समानेऽपि तेषु च वैशेष्यात्तु तद्वादः तद्वादः इति न्यायेनाकाशादिव्यपदेशाः संभवंति तदानीमा
काशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपरसाः पृथि
व्यां शब्दस्पर्शरूपरसगंधाश्च ॥

कृतानां पंचात्मकत्वाविशेषादाकाशादिव्यपदेशो न स्यादित्याशंक्य परिहरति पंचानामिति आका
शादीनां पंचानां पंचात्मकत्वे समानेऽपि तेषु पंचभूतेषु तत्तद्विशेषान्नप्रवेशात्तन्नामभिर्व्यवहारः संभव
तीत्यर्थः तदानीमिति यदा पंचीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वकार्यारंभसमर्थतादाकाशे
व्यक्तरूपेण स्थितः शब्दः अभिव्यज्यते व्यक्तो भवतीत्यर्थः ॥ ॥ ॥

वे॰सा॰ उक्तेभ्यो भूतेभ्यः चतुर्दशभुवनोत्पत्तिप्रकारं दर्शयति एतेभ्य इति एतेभ्यो भूतेभ्यः समस्तब्रह्माण्डस्य चतु
टी॰ विधशरीराणां तद्योग्यान्नपानादीनां चोत्पत्तिर्भवतीत्यर्थः चतुर्विधशरीराण्युद्दिशति चतुर्विधेति ना
२१ नाविधयोर्देहाविर्भूतानीति जरायुज इति पूर्ववदत्रापि समष्टिव्यष्टिभेदं दर्शयति अत्रापीति चतुर्विधशरी

17

एतेभ्यः पंचीकृतेभ्यो भूतेभ्यः भूर्भुवःस्वर्महर्जनःतपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानां अतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गतानां चतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि जरायुजानि मनुष्यपश्वादीनि अण्डजानि पक्षिपन्नगादीनि उद्भिज्जानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि संभवति ॥ ॥ ॥

स्थूलमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टिः तदेवानेकं तत्तच्छरीरविषयतयानेकबुद्धिविषयतया तद्व्यष्टिरिति च लभ्यतेऽस्यार्थः अधुना भूरादिचतुर्दशभुवनान्तर्गतचतुर्विधस्थूलशरीरसमष्टिमुपदिश्य तच्चैतन्यस्य वैश्वानरत्वापरपर्यायं वैराजत्वं दर्शयति ॥ ॥ ॥ ॥ ॥ राम॰
२१

एतदिति तत्र फलितमाह सर्वनराभिमानित्वादिति सर्वप्राणिनिकायेष्वहमित्यभिमानवत्त्वाद्वैश्वानरत्वं। विविधं नानाप्रकारेण प्रकाशमानत्वाच्च वैराजत्वं लभत इत्यर्थः अस्यैषेति अस्य विराट्चैतन्यस्यैषा पूर्वोक्ता यावद्ब्रह्माण्डान्तर्गतचतुर्विधस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः अन्नविकारत्वादिति अन्नविकारत्वाद्धेतोरन्नमयत्वं आत्माच्छादकत्वात्कोशत्वं स्थूलशरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरीरत्वं इन्द्रियैरर्थोपलम्भाज्जाग्रदवस्थात्वेच्यत इत्यर्थः चतुर्विधस्थूलशरीरसमष्ट्युपहित। चैतन्यं सप्रपंचमभिधायेदानीं तद्व्यष्ट्युपहितं चैतन्यमभिधत्ते एतदिति एतेषां चतुर्विधशरीराणां या व्यष्टिः

एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च अस्यैषा समष्टिः स्थूलशरीरं अन्नविकारत्वादन्नमयः कोशः स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदित्यपदिश्यते एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् अस्याप्येषा व्यष्टिः स्थूलशरीरं अन्नविकारत्वादेव हेतोरन्नमयकोशः स्थूलभोगायतनत्वाच्च जाग्रदिति चोच्यते ॥

तत्तच्छरीरव्यक्तिः तदुपहितं चैतन्यं विश्व इत्युच्यत इत्यर्थः तत्र हेतुमाह सूक्ष्मशरीराभिमानमिति सूक्ष्मलिंगशरीराभिमानं परित्यज्य स्थूलशरीरेष्वनुप्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकमहमित्यभिमानवत्त्वाद्विश्वत्वमित्यर्थः अस्यापीति अस्य विश्वचैतन्यस्याप्येषा तत्तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिः सैव स्थूलशरीरमित्यर्थः अत्राप्यन्नविकारत्वाद्धेतोरन्नमयत्वं चैतन्याच्छा

18

अधुनाजाग्रदवस्थायांविश्ववैश्वानरयोःतत्तद्देवताधिष्ठितश्रोत्रादिभिःचक्षुरादिभिःकरणैःशब्दादिविषयग्रह
णप्रकारंदर्शयति तदानीमिति अस्मिन्नर्थेश्रुतिंसंवादयति जागरितेति जागरितस्थानोयस्यसजागरितस्था
नःबहिःरूपादौचक्षुरादिद्वाराद्येषएवबहिःप्रज्ञायस्यसबहिःप्रज्ञः अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्ना

तदानीमेतौविश्ववैश्वानरौदिग्वातार्कवरुणाश्विभिःक्रमान्नियंत्रितेनश्रोत्रादींद्रियपंचकेनक्रमाच्छ
ब्दस्पर्शरूपरसगंधान् अग्नींद्रोपेंद्रयमप्रजापतिभिःक्रमान्नियंत्रितेनवागादींद्रियपंचकेनक्रमाद्वचना
दानगमनविसर्गानंदादीन्चंद्रचतुर्मुखशंकराच्युतैःक्रमान्नियंत्रितेनमनोबुद्ध्यहंकारचित्ताख्ये
नांतरिंद्रियचतुष्केनक्रमात्संकल्पविकल्पनिश्चयाहंकार्यचैत्तांश्चसर्वानेतान्स्थूलविषयाननुभवतः
जागरितस्थानोबहिःप्रज्ञइत्यादिश्रुतेः अत्राप्यनयोःस्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वान
रयोश्चवनवृक्षवत्तदवच्छिन्नाकाशवच्चजलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चपूर्ववदभेदःएवंपं
चीकृतभूतेभ्यःस्थूलप्रपंचोत्पत्तिः॥

काशदृष्टांतजलाशयगतप्रतिबिंबाकाशदृष्टांतेनचपूर्ववदभेदंसाधयति अत्रापीति स्थूलप्रपंचोत्पत्तिमु
पसंहरति एवमिति स्थूलसूक्ष्मकारणप्रपंचानांव्यष्टिभूतानांप्रत्येकविवक्षयाऽवांतरप्रपंचत्वमभिधाये
दानीमेषांसमष्टिरेकंमहाप्रपंचत्वंदर्शयति एतेषामिति तत्रदृष्टांतमाह यथेति यथाधवखदिरपलाशाद्य

वांतरवनानांसमष्टिःसमुदायविवक्षयाएकंमहद्वनं॥

भवति यथा वा वापीकूपतडागाद्यवान्तरजलाशयानां समष्टिः समुदायविवक्षया एको महाञ्जलाशयो भवति
तथैतेषां स्थूलसूक्ष्मकारणावान्तरप्रपंचानामपि समष्टिः समुदायविवक्षया एको महान्प्रपंचो भवतीत्य
र्थः एतदेवाऽवान्तरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भाव्याकृतानां चावान्तरव
नावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिंबाकाशवच्चाभेद इत्याह एतदुपहितमिति चैतन्यमपि

एतेषां स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति यथाऽवान्तरवनानां सम
ष्टिरेकं महद्वनं भवति यथा वाऽवान्तरजलाशयानां समष्टिरेको महाञ्जलाशयः एतदुपहितं वै
श्वानरादीश्वरपर्यंतं चैतन्यमप्यऽवान्तरवनावच्छिन्नाकाशवदऽवान्तरजलाशयगतप्रतिबिंबाका
शवच्चैकमेव आभ्यां महाप्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितं
चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति एवं वस्तुन्यवस्त्वा
रोपोऽध्यारोपः सामान्येन प्रदर्शितः ॥

वयोर्भेदे सर्वं खल्विदं ब्रह्मेति श्रुत्या विरोधमाशंक्य परिहरति आभ्यामिति उक्तमहाप्रपंचतदवच्छिन्न
चैतन्याभ्यां तप्तायःपिंडवदन्योन्यतादात्म्याध्यासापन्नं यद्वस्तु श्रुतं तदवच्छिन्नचैतन्यं सर्वं खल्विदं ब्रह्मेति
वाच्यं भवति अन्योन्यतादात्म्याध्यासरहितं सल्लक्ष्यं भवतीत्यर्थः अध्यारोपप्रकरणमुपसंहरति एवमिति
ईश्वरचैतन्ये सामान्यतो महाप्रपंचाध्यारोपप्रकारं संप्रपंच मभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोपप्रकारं दर्शि

वे॰ सा॰ टी॰ १९

19

अथारोपमेवाह अस्यत्यादि संनिहितस्यापत्यादिधर्मिण इदमिदं विनिर्देशः क्रियत इदमित्यादरेवीक्षात तथा चा
तिस्थूलबुद्धिस्तु इदमपत्यादिकमेवाह अयं पुत्रप्रवाहस्तत्वतवाहाद्यर्थमविशेषेणात्मस्वथारोपयतीत्यर्थः
अत्र श्रुतिमाह आत्मा वा इति तत्र युक्तिमाह स्वस्मिन्निति यथा स्वशरीरे प्रेमदर्शनादात्मत्वभ्रमः एवं स्व
पुत्रादिशरीरेऽपि प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः अत्रानुभवमनुभवमाचष्टे पुत्र इति एतदपेक्षया विशि

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते अतिप्राकृतस्तु आत्मा वै जायते पुत्र इ
ति श्रुतेः स्वस्मिन्निव पुत्रेऽपि प्रेमदर्शनात पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मे
ति वदति चार्वाकस्तु स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्व
स्य निर्गमनदर्शनात् स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति अपरश्चार्वाका
स्तु इन्द्रियानीह प्राणाः सह प्रजापतिमेत्य ब्रूयुरित्यादिश्रुतेः इन्द्रियाणामभावे शरीरचलनाभावा
त्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाणात्मेति वदति ॥

ष्टबुद्धिरन्यः कश्चिदधिकारी स्वदेहमेवात्मानं मन्यत इत्याह चा
र्वाकस्त्विति अत्रापि श्रुतिमाह स वा इति पुत्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन् पूर्वोक्ताधिकारिणः स
काशात्स्वस्यैव लक्षणं दर्शयति प्रदीप्तगृहादिति देहस्यात्मत्वेऽनुभवं च प्रमाणयति स्थूलोऽहमिति ततो
ऽप्युत्कृष्टः कोऽप्यधिकारी श्रुतियुक्त्यनुभवेभ्यः इन्द्रियाण्यात्मेति वदतीत्याहापर इति ॥ १९

ततोप्युत्तमोऽधिकारी कश्चिच्छ्रुतिप्रमाणानुभवयुक्तिबलात्प्राण एवात्मेत्याह अपर इति ततो विशिष्टोऽधि
कारी कश्चित्तु मतान्तरमूलश्रुत्यादिबलान्मन एवात्मेत्याह अन्यस्त्विति उक्तेभ्यः पंचेभ्यो विलक्षणः कश्चि
द्विज्ञानवाक्श्रुत्यादिभिर्विज्ञानमात्मेत्याह बौद्धस्त्विति उक्तेभ्यो व्यतिरिक्तो प्राभाकरतार्किकौ त्वमतोपर्याति

अपरश्चार्वाकोऽन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इन्द्रियादिचलनायोगात् अहम
शनावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति अन्यस्तु चार्वाकोऽन्योऽन्तर आत्मा मनो
मय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावादहमेव संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च
मन आत्मेति वदति बौद्धस्त्वन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभा
वादहं कर्ता भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति प्राभाकरतार्किकौ त्वन्योऽन्तर आत्मानन्दमय इ
त्यादिश्रुतेः बुद्ध्यादीनामज्ञाने लयदर्शनात् अहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः
भट्टस्तु प्रज्ञानघन एवानन्दमय इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावादात्मानमहं न जा
नामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति अपरो बौद्धः असदेवेदमग्र आसीदित्या
दिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्म

श्रुत्यादिसद्भावाद्ज्ञानमात्मेति वदति इत्याह प्राभाकरतार्किकाविति अन्यभट्टस्तु ज्ञानावच्छिन्नं चैतन्य
मात्मेत्याह भट्टस्त्विति बौद्धैकदेशी कश्चिच्छ्रुत्यादिभिः शून्यमात्मेति वदतीत्याह अपर इति अयं नाप्युक्तादिषु

मात्मत्वप्रतिपादकश्रुत्यादेराभासत्वात्पूर्वपूर्वमतस्योत्तरोत्तरमतबाध्यत्वाच्च एषां तु जडत्वादिहेतुकं देवकैश्चानात्मत्वं
प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते एतेषामिति पुत्राद्यात्मवादिनां मतिभेदाधिकारित्वात्तत्तत्प्रतिपादितश्रु
त्यादेरपि पूर्वपूर्वस्योत्तरोत्तरबाध्यत्वात् पुत्रादिशून्यान्तानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति
एतैरिति ननु पुत्रादिशून्यपर्यन्तानामनात्मत्वे सिद्धे कस्तर्हि अहंप्रत्ययविषय आत्मेत्याशंक्य अस्थूलादिनिषेध।

एतेषां पुत्रादीनां शून्यपर्यन्तानामनात्मत्वमित्युच्यते एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनु
भवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधद
र्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव किंच प्रत्यगस्थूलोचक्षुरप्राणोमना अकर्ता चैतन्यं चिन्मात्रं
सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्य।
त्वात् अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च ॥

वाक्यजातबोधितं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिविधिवाक्यकोटिबोधितं यत्सत्यज्ञानानन्तानन्दाद्वयब्रह्म तदे
वाहंप्रत्ययालंबनमिति प्रबलश्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह किंचेति अस्थूलादिप्रबलश्रुतिवा।
क्यैः पुत्रादिशून्यपर्यन्तात्मातिरिक्तात्मस्वरूपप्रतिपादनात् पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थः
अस्मिन्नर्थे प्रबलविद्वदनुभवं प्रमाणयति अहमिति पुत्रादिश्रुत्यादीनां दौर्बल्यं दर्शयति ॥ ॥

तन्नरिति यतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमतः पुत्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्ति
त्यर्थः ननु इदं विरुद्धं यत्पुत्रादीनामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यं अस्थूलादिश्रुतीनां प्रामाण्यमिति
नहि वेदवाक्येषु केषांचिदप्रामाण्यं केषांचित्प्रामाण्यमिति वाशक्यं प्रतिपादयितुं एवं चेत्पुत्रादिश्रुतीनामप्रा
माण्यमस्थूलादिवाक्यानामप्रामाण्यमिति वैपरीत्यं किं न स्यात् वेदवाक्यत्वाविशेषात् किं च केषांचिद्वेदवा
क्यानामप्रामाण्यं केषांचिद्वेदवाक्यानां प्रामाण्यं प्रतिपादनार्थमिदं प्रकरणमारब्धं अतः कथं निर्णय इति
चेन्न उच्यते पुत्रादिश्रुतीनां सर्वथैव प्रामाण्यं नास्तीत्यस्माभिर्न निषिध्यते किंत्वस्थूलादिप्रबलश्रुतिसत्त्व।

तत्र श्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैवातः तत्तद्भास
कं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः ॥

ति न्यायविरोधात्स्वार्थे तात्पर्याभावात्तेषां स्थूलारुन्धतीन्यायेन पूर्वपूर्वनिराकरणद्वारा स्थूलत्वसूक्ष्मत्व
व्यपदेशेन तात्पर्यमिति एतावदेव प्रतिपाद्यते तथाहि ध्रुवमरुन्धतीं च दर्शयतीति विधिबलाद्वरवध्वो।
रुन्धतीदर्शने प्राप्ते परमसूक्ष्मरूपाया अरुन्धत्याः प्रथमकल्पायामेव प्रतिपत्तुमशक्यत्वात्प्रथमं चन्द्रज्यो
तीरूपारुन्धतीत्युच्यते ततः चन्द्रभिन्ना तारकारुन्धतीत्युच्यते तत उत्तरतारकाभिन्ना सप्ततारकात्मका।
रुन्धतीत्युच्यते तदनन्तरमितरतारकाचतुष्टयभिन्ना तारकात्रितयात्मके ॥

वे॰सा॰ स्तुच्यते ततः तन्मध्यतारके त्युच्यते ततस्तत्समीपवर्तिनी परमसूक्ष्मारुंधतीत्युच्यते नचैतावतैतेषां पंचा
टी॰ नां वाक्यानां परस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यं शंक्यं प्रतिपादयितृ किंतु प्रतिपन्नबुध्यनुसारेण सो॰
२१ पानक्रमवत्पूर्वं पूर्वं निराकरणद्वारा सूक्ष्मारुंधतीप्रतिपादनेनान्यर्थ्यं तद्वदत्राप्यन्नमयः प्राणमयो मनोमयो
21 विज्ञानमय आनंदमय आत्मा ब्रह्मपुच्छं प्रतिष्ठेति पुच्छब्रह्मपर्यवसितानां पंचकोशवाक्यानामपि परस्पर॰
विरुद्धार्थप्रतिपादकत्वेपि प्रतिपन्नबुध्यनुसारेण सोपानक्रमवत्पूर्वं पूर्वं निराकरणद्वारा परमसूक्ष्मपुच्छ

एवमध्यारोपः अपवादो नाम ॥

ब्रह्मप्रतिपादनेनान्यर्थ्यं तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया वा अद्वितीयवस्तुप्रतिपादनेनान्यया॰
प्रामाण्याविरोध इति संक्षेपः विशेषाध्यारोपप्रकरणमुपसंहरति एवमिति आत्मवस्तुनि मिथ्याप्रपंचस्य॰
सामान्यतो विशेषतश्चाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं तदपवादप्रकारं वक्तुमारभते अपवादो ना॰
मेति असंगोदासीने परमात्मवस्तुनि तद्विवर्तावस्तुभूता ज्ञानादिमिथ्याप्रपंचस्य चिद्वस्तुमात्रावशेषतया
वस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकं दृष्टांतमाह ॥ वासुदेवाय नमः ॥

रज्जुरिति रज्जुस्वरूपापरित्यागेन सर्पाकारेणावभासमानस्य रज्जुविवर्तस्यापवादो नाशो नामाधिष्ठानरज्जुमात्रत-
याऽवस्थानवच्चिद्विवर्तस्याऽज्ञानादिप्रपंचस्यापवादो नाशो नाम चिन्मात्रत्वेनावस्थानमित्यर्थः अत्र यथास्व-
रूपेणावस्थितस्य वस्तुनोऽन्यथाभावो द्विधा भवति परिणामभावो विवर्तभावश्चेति तत्र परिणामस्वभावो नाम व-
स्तुनो यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिः यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिण-
मति विवर्तभावस्तु वस्तुनः स्वस्वरूपाऽपरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः यथा रज्जुः स्वस्वरूपाप-
रित्यागेन सर्पाकारेण मिथ्याप्रतिभासते अत्र वेदान्ते ब्रह्मणि प्रपंचभानस्य परिणामभावो नाङ्गीक्रियतेऽन्यथा।

रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं ॥

दिवद्ब्रह्मणो विकारित्वप्रसंगादनित्यत्वादिदोषापत्तेः विवर्तभावाङ्गीकारे तु नायं दोषः ब्रह्मणि प्रपंचभा-
नस्य मिथ्यात्वेन विकारित्वाभावात्तदुक्तं अधिष्ठानावशेषो हि नाशः कल्पितवस्तुन इति तस्माच्चिद्विव-
र्तस्य प्रपंचस्य चिन्मात्रावशेषतयावस्थानमेवापवाद इति भावः अस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति सतत्त्व-
तोऽन्यथाप्रथा विकार इत्युदीरितः अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः सामान्यतो दर्शितापवादप्रक्रि-
यां विस्तरेण प्रतिपादयितुं प्रतिजानीते तथा हि स्थूलसूक्ष्मकारणप्रपंचानामुत्पत्तिवैपरीत्येन तत्तत्कार
णरूपेणावस्थानमेवापवाद इत्याह ॥

वे॰सा॰
टी॰
२२

एतद्भोगायतनमिति एतत्स्थूलशरीरं स्वाश्रयब्रह्मांडसहितं स्वकारणभूतपंचीकृतेषु पंचमहाभूतेषु लीनं सत्तन्मात्रतयावशिष्टान्येतानि च पंचीकृतानि भूतानि शब्दादिसहितानि सप्तदशावयवात्मकलिंगशरीराणि च स्वकारणेष्वपंचीकृतेभूतेषु लीनानि भवंति तान्यपंचीकृतानि भूतानि सत्वादिगुणसहितानि

एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं तद्भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनानि एतदायतनभूतब्रह्मांडं च एतत्सर्वमेतेषां कारणरूपपंचीकृतभूतमात्रं भवति एतानि शब्दादिविषयसहितानि पंचीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापंचीकृतभूतमात्रं भवति एतानि सत्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति एतदज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितं चैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति ॥

स्वकारणाज्ञानोपहितचैतन्ये लीनानि भवंति तच्चाज्ञानं तदुपहितचैतन्यं सर्वज्ञत्वादिविशिष्टं च स्वाधारभूतानुपहितचैतन्ये लीनं भवति चैतन्यमेवावशिष्यत इत्यर्थः फलितमाह आभ्यामिति तत्त्वंपदार्थशोधनमकारं प्रतिजानीते ॥ नमो नारायणाय नमः ॥

तथा हीति अज्ञानेनावच्छिन्नेश्वरचैतन्यं तदनुपहितं चैतन्यं चैतद्द्वयं तप्तायःपिण्डवदन्योन्यतादात्म्याध्या-
सेनैकत्वेन प्रतीयमानं सत्तत्पदवाच्यार्थो भवतीत्यर्थः तत्पदलक्ष्यार्थमाह एतदुपाधीति अज्ञानावच्छि-
न्नेश्वरचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्ताभ्यां विविक्तं सद्विवक्षया तत्पदलक्ष्यार्थो भवती-
त्यर्थः त्वंपदवाच्यार्थमाह अज्ञानादीति व्यष्टिभूतं यदज्ञानमन्तःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहि-

तथाहि अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतन्यं चैतद्द्वयं त-
प्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति एतदुपाध्युपहिताधारमनुपहितं
चैतन्यं तत्पदलक्ष्यार्थो भवति अज्ञानादिव्यष्टिरेतदुपहितमल्पज्ञत्वादिविशिष्टं चैतन्यमेतद-
नुपहितं चैतन्यं चैतद्द्वयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति एतदुपाध्युप-
हिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति अथ महावाक्यार्थो वर्ण्यते

तं चैतन्यं चैतद्द्वयं तप्तायःपिण्डवत्परस्परतादात्म्याध्यासेनाभेदविवक्षया त्वंपदवाच्यार्थो भवतीत्यर्थः ।
लक्ष्यार्थमाह एतदुपाधीति अन्तःकरणोपहितचैतन्यस्याधारभूतं यदनुपहितं प्रत्यगात्मानन्दं तुरीयं चै-
तन्यं त्वंपदलक्ष्यार्थो भवतीत्यर्थः पदार्थमभिधाय वाक्यार्थमाह अथेति ननु जीवेश्वरयोः किंचिज्ज्ञत्वस-
र्वज्ञत्वाविशि ॥

ष्टयोरत्यंतविलक्षणयोः तत्त्वमस्यादिमहावाक्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखंडैकरसं ब्रह्म प्रतिपादयंतीत्याशंक्य साक्षादेकप्रतिपादकत्वाभावेपि लक्षणया संबंधत्रयेणाखंडैकार्थं प्रतिपादयंती। त्याह इदमिति संबंधत्रयस्वरूपमाह संबंधत्रयमिति पदार्थप्रत्यगात्मनोः संबंधत्रयसंज्ञां वेदितुं संमति। माह तदुक्तमिति पदयोः सामानाधिकरण्यमुदाहरणनिष्ठं कृत्वा प्रदर्शयति सामानाधिकरण्यमि

इदं तत्त्वमसिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति संबंधत्रयं नाम पदयोः सामानाधिकरण्यं। पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोः लक्ष्यलक्षणभावश्चेति तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामिति सामानाधिकरण्यसंबंधस्तावत् यथा सोयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैत। त्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः ॥

ति भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः॰ सामानाधिकरण्यं तत्र सोयं देवदत्त इति वाक्ये स इति तत्परस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तं एतत्कालेतद्देशवैशिष्ट्यमयंशब्दस्य प्रवृत्तिनिमित्तं तथा च भिन्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन्देवदत्तपिंडे तात्पर्यसंबंधः॰ सामानाधिकरण्यमित्यर्थः उक्तमर्थं दार्ष्टांतिके योजयति ॥

तथा चेति तथा तत्त्वमसीति वाक्ये पि परोक्षत्वसर्वज्ञत्वादिविशिष्टं तत्पदप्रवृत्तिनिमित्तं अपरोक्षत्वकिंचिज्ज्ञ-
त्वादिविशिष्टं त्वंपदप्रवृत्तिनिमित्तं तथा च भिन्नप्रवृत्तिनिमित्तयोः तत्त्वंपदयोरेकस्मिंश्चैतन्ये तात्पर्यसंबंधः
सामानाधिकरण्यमित्यर्थः विशेषणविशेष्यभावसंबंधस्वरूपमाह विशेषणेति व्यावर्तकं विशेषणं
व्यावर्त्यं विशेष्यं तथा च योयं देवदत्त इति वाक्ये पवायंशब्दवाच्यो योसौ तत्कालतद्देशसंबंधविशिष्टो देव
दत्तपिंडः अयं स इति तच्छब्दवाच्यात्तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते तदा तच्छब्दा-

तथा च तत्त्वमसीति वाक्ये पि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवा-
चकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सश-
ब्दार्थस्य तत्कालविशिष्टदेवदत्तस्यायंशब्दार्थस्यैतत्कालविशिष्टदेवदत्तस्यान्योन्यभेदव्यावर्तकतया
विशेषणविशेष्यभावः ॥

र्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं अयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं यदा च स इति
तच्छब्दवाच्यः तत्कालतद्देशविशिष्टो देवदत्तपिंडः स अयमितीदंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टा-
देतस्माद्देवदत्तपिंडान्न भिद्यत इति यदा प्रतीयते तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेष-
णत्वं तच्छब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं तथा चायमेव सः स एवायमिति अन्योन्यभेदव्यावर्तकतया सोयंशब्दा-
र्थयोः परस्परं विशेषणविशेष्यभाव इत्यर्थः उक्तं विशेषणविशेष्यभावं दार्ष्टांतिके योजयति ॥ ॥

तथाचापीति इहापि तत्त्वमसीति वाक्येपि त्वंपदवाच्यं यदपरोक्षत्वकिंचिज्ज्ञत्वादिविशिष्टं चैतन्यं तत्पदवाच्यात्स
र्वज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वंपदार्थनिष्ठभेदव्यावर्तकतया वि
शेषणत्वं त्वंपदार्थस्य व्यावर्त्यत्वात् विशेष्यत्वं यदा च तत्पदवाच्यं यत्सर्वज्ञत्वादिविशिष्टचैतन्यं त्वंपदवाच्या
त्किंचिज्ज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन।
विशेषणत्वं तत्पदार्थस्य व्यावर्त्यत्वात् विशेष्यत्वं तथा च त्वं तदसि तत्त्वमसीति तत्त्वंपदार्थयोः परस्परं भेद।

तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चा
न्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः लक्ष्यलक्षणसंबंधस्तु यथा तत्रैव सशब्दायंशब्दयोः
तदर्थयोर्वा परस्परविरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्ष
णभावः ॥

व्यावर्तकत्वेन परस्परं विशेषणविशेष्यभाव इत्यर्थः क्रमप्राप्तं लक्ष्यलक्षणभावसंबंध
स्वरूपं निरूपयितुमाह लक्ष्यलक्षणेति असाधारणधर्मप्रतिपादकं वाक्यं लक्षणवाक्यं तत्प्रतिपाद्यमव
शिष्टं वस्तु लक्ष्यं तथा च सोऽयं देवदत्त इत्यस्मिन्नेव वाक्ये सोऽयंशब्दयोः तदर्थयोर्वा विरुद्धतत्कालतद्देशा
विशिष्टत्वपरिहारेणाविरुद्धदेवदत्तपिंडेन सह लक्ष्यलक्षणभावसंबंध इत्यर्थः उक्तमर्थं दार्ष्टान्तिके।
योजयति ॥

तथाचार्यौति इहापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वपरित्यागेन तत्त्वंपदाभ्यां लक्ष्या
ऽविरुद्धचैतन्येन सह लक्ष्यलक्षणाभावसंबंध इत्यर्थः अत्र तत्त्वंपदयोः तदर्थयोर्वा न्यस्तविरुद्धांशयो
र्लक्षणात्वे अखंडचैतन्यस्य लक्ष्यत्वमिति भावः तत्र तत्त्वमस्यादिवाक्यानां लक्ष्यलक्षणभावसंबंधपुर
स्कारेण चैतन्यबोधकत्वमित्युक्तं अन्यत्र तु ग्रन्थे तेषां वाक्यानां भागलक्षणयैव चैतन्यबोधकत्वं प्रतिपा
दितं तत्त्वमस्यादिवाक्येषु लक्षणाभागलक्षणेत्यादिषु विरोधमांशं कसंज्ञाभेदो न वस्तुभेद इत्याह ।
इयमेवेति तत्त्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्षणे

तथात्रापि वाक्ये तत्त्वंपदयोः तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्ध
चैतन्येन सह लक्ष्यलक्षणभावः इयमेव भागलक्षणेत्युच्यते अस्मिन्वाक्ये नीलमुत्पलमितिवाक्य
वद्वाक्यार्थो न संगच्छते ॥

त्युच्यत इत्यर्थः ननु यथा नीलोत्पलमिति वाक्ये नीलत्वविशिष्टनीलगुणस्य
उत्पलत्वविशिष्टोत्पलद्रव्यस्य च स्वव्यतिरिक्तरक्तादिगुणान्तरपटादिद्रव्यान्तरव्यावर्त्तकत्वेन विशेषण
विशेष्यभावनिरूपितं तद्भिन्नत्वं संसर्गस्य नीलगुणवैशिष्ट्यस्य वा वाक्यार्थत्वं तथेहापि तत्त्वमस्यादिवाक्ये त
त्पदार्थस्य परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य त्वंपदार्थस्यापरोक्षत्वादिविशिष्टजीवचैतन्यस्य चान्योन्यभेद
व्यावर्तकतया विशेषणविशेष्यभूतसर्वज्ञत्वकिंचिज्ज्ञत्वोभयनिरूपितसंसर्गो वा सर्वज्ञत्वादिविशिष्ट
स्य किंचिज्ज्ञत्वादिविशिष्टेन सहैक्यं वा वाक्यार्थो भवतीत्याशंक्य दृष्टान्तदार्ष्टान्तिकयोः वैषम्यान्नैवमित्या
ह अस्मिन्नित्यादिना अस्मिन्निति अस्मिंस्तत्त्वमसीतिवाक्ये नीलोत्पलमित्यादिवाक्यवत्संसर्गो वा

लक्षितलक्षणावृत्तिप्रदर्शनं ॥

वे॰ सा॰
टी॰
२५
25

नीलोत्पलमिति वाक्यस्य संसर्गो वैशिष्ट्यार्थप्रतिपादकत्वकल्पने विरोधाभावं दर्शयति तत्र त्विति नीलोत्पलपदार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुणविशिष्टोत्पलयोरैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाभावात्तत्र तथा संगच्छत इति भावः तत्त्वमसीति वाक्ये तु तत्त्वंपदार्थयोः किंचिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य सर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्य वान्योन्यविशेषणविशेष्यभावसं

तत्र तु नीलपदार्थस्य नीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिव्यावर्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात्तद्वाक्यार्थः संगच्छते अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न संगच्छते तदुक्तं संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखण्डैकरसत्वेन वाक्यार्थो विदुषां मत इति ॥

सर्गस्य तदुभयविशिष्टचैतन्यैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधात्पूर्वस्माद्वैषम्यं दर्शयति अत्र त्विति तत्त्वमस्यादिवाक्यमखण्डार्थकं बोधयति जहल्लक्षणया वा किमजहल्लक्षणया अहोस्विज्जहदजहल्लक्षणयेति त्रिधा विकल्पः आद्ये दूषणमाह अत्र त्विति अत्र तु तत्त्वमसीति वाक्ये जहल्लक्षणा न संगच्छत इत्यन्वयः तदेव दर्शयितुं जहल्लक्षणाया उदाहरणं ॥ ॥ २५

तावदाह गंगायामिति मानांतरविरोधे तु मुख्यार्थस्यापरिग्रहे मुख्यार्थेनाविनाभूते प्रवृत्तिर्लक्षणेष्यत इ
तिवचनाद्गंगायां घोषवसत्यसंभवाद्गंगायां घोष इतिवाक्यस्य मुख्यार्थविरोधे सति मुख्यार्थं परित्यज्य ल
क्षणया तत्संबंधितीरे घोषावस्थानप्रतिपादनात्तत्र जहल्लक्षणांगीकारो युक्ततरः स्यादाह तत्रेति आ
धाराधेयभावलक्षणस्य सर्वथा परित्यज्येत्यर्थः तत्त्वमसीतिवाक्ये प्रकृते तु जहल्लक्षणासंभवमाविष्करोति

अत्र तु गंगायां घोषः प्रतिवसतीतिवाक्यवज्जहल्लक्षणा न संगच्छते तत्र तु गंगाघोषयोराधारा
धेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वात् वाक्यार्थमशेषतः परित्यज्य तत्संबंधितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते अत्र तु परोक्षापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षण
स्य वाक्यार्थस्य भागमात्रे विरोधात् ॥

ति अत्रत्विति तु शब्दः पूर्वस्माद्वैषम्यं द्योतयति तत्त्वमसीतिवाक्ये परोक्षापरोक्षत्वविशिष्टचैतन्यैकत्वल
क्षणस्य वाक्यार्थस्याविरोधाभावात्परोक्षत्वापरोक्षत्वप्रतिपादकतांशे विरोधाच्चैतन्यैकत्वे विरोधाभावाद्गं
गाघोषादिवाक्यवत्सर्वात्मना मुख्यार्थपरित्यागासंभवाज्जहल्लक्षणा न संभवतीत्यर्थः तत्र हेतुमाह ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वे·सा
टी·
२६
20

भागांतरमिति विरुद्धयोः परोक्षत्वापरोक्षत्वयोरेकत्वासंभवेन तस्य विरोधिभागे परित्यक्ते तस्य भागस्यैकत्वे विरोधा
भावात्भागेन युक्तत्वमित्यर्थः ननु यथा गंगायां घोषः प्रतिवसतीति वाक्ये गंगापदं प्रवाहलक्षणं स्वार्थं प
रित्यज्य स्वसंबंधीतीरपदार्थं लक्षयति तथा तत्त्वमसीति वाक्ये तत्पदं स्वार्थं परोक्षत्वादिविशिष्टं परित्यज्य
जीवचैतन्यं लक्षयतु एवं त्वंपदमपि स्वार्थं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्येश्वरचैतन्यं वा लक्षयतु तस्माज्जहल्ल

भागांतरमपि परित्यज्यान्यलक्षणायाम् अप्रयुक्तत्वात् जहल्लक्षणा न संगच्छते न च गंगापदं स्वार्थं
परित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं
वा लक्षयतु अतः कुतो न जहल्लक्षणा न संगच्छत इति वाच्यं तत्र तीरपदश्रवणेन तदर्थप्रतीतौ
लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यत
रपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात् अतः वाक्यस्य मुख्यार्थविरोधे मुख्यार्थसंबंधिन्यत्र
तत्पदार्थे लक्षणेति सर्वजनप्रसिद्धं ॥ ॥

लक्षणैव भवतीत्याशंकां निराकरोति न चेति निराकरणप्रकारमेवाह तत्रेति तथा च गंगायां घोष इत्यत्र
तद्वाक्यार्थस्य गंगाघोषयोराधाराधेयभावसंबंधस्य विरोधे सति श्रूयमाणगंगापदं स्वार्थपरित्यागेन ती
रपदार्थं लक्षयतीति युक्तं गंगापदस्य तीरपदार्थप्रतीतिसापेक्षत्वादिह तु श्रूयमाणतत्त्वंपदयोर्न ॥ ॥ राम·
२६

स्यात्तथैव तदर्थस्य सर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभा-
वात्त्वंपदेन तत्पदार्थप्रतीत्यपेक्षाभावाच्च मुख्यार्थसंभवति लक्षणाया अप्राप्यत्वात् जहल्लक्षणा न संभवतीत्य-
र्थः द्वितीयं पक्षं दूषयति अजहल्लक्षणापि न संभवतीत्यादि अत्र शोणो धावतीति अत्र तत्त्वमसीति वाक्ये
शोणो धावतीति वाक्यवत् अजहल्लक्षणा न संभवतीत्यन्वयः कुत इत्यत आह तत्रेति तत्र शोणो धावतीति वा-
क्ये शोणगुणस्य गमनासंभवेन वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणशोणपदं स्वार्थापरित्यागेन साश्र-

अत्र शोणो धावतीति वाक्यवदजहल्लक्षणापि न संभवति तत्र शोणगुणगमनलक्षणस्य वाक्या-
र्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसंभवादजहल्लक्षणा सं-
भवति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन त-
त्संबंधिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासंभवादजहल्लक्षणापि न संभवत्येव

यमश्वादिकं लक्षयतीति युक्तं अत्रेति अत्र तत्त्वमस्यादिवाक्ये तत्त्वंपदार्थस्य परोक्षत्वापरोक्षत्वादिविशि-
ष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्धत्वात् परोक्षत्वापरोक्षत्वाद्यपरित्यागेन तद्विशिष्टचैतन्यलक्षणा-
र्थस्य लक्षितत्वे तद्विरोधपरिहाराभावादजहल्लक्षणा न संभवतीत्यर्थः ननु तत्पदं स्वार्थविरुद्धपरोक्षत्वादिध-
र्मपरि ॥ ॥ ॥ ॥

वे०सा० २७ त्यक्त्वाविरुद्धचैतन्यांशस्यापरित्यागेन त्वंपदार्थे किंचिज्ज्ञत्वादिविशिष्टजीवचैतन्यं लक्षयतु त्वंपदं वा
स्वार्थविरुद्धापरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशस्यापरित्यागेन तत्पदार्थे सर्वज्ञत्वादिवि
शिष्टमीश्वरचैतन्यं लक्षयतु किं भागलक्षणाङ्गीकारेणेत्याशङ्क्य निराकरोति नचेति एकेन
27 तत्पदेन त्वंपदेन वा स्वार्थांशपरित्यागपदार्थान्तरस्वीकारोभयलक्षणासंभवादित्यर्थः अजह

न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वंपदार्थं तत्पदार्थं वा लक्षयतु
अतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यं एकेन स्वार्थांशपरित्यागपदा
र्थान्तरस्वीकारोभयलक्षणाया असंभवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनः तत्प्रती
त्यपेक्षाभावाच्च तस्माद्यथा सोयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तैक
त्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धं तत्कालैतत्कालविशिष्टांशं परित्यज्याविरुद्धदेवदत्तां

लक्षणासंभवे हेत्वन्तरमाह पदान्तरेणेति तत्पदेन त्वंपदेन वा ज्ञातस्तदर्थप्रतीतौ सत्यां लक्षणया पुनस्तस्य
स्याः पुनः प्रतीत्यपेक्षाभावादित्यर्थः अतः परिशेषात्तृतीयपक्ष एवाङ्गीकर्तव्य इत्युपसंहरति तस्मादि
ति यस्मात्तत्त्वमस्यादिवाक्ये जहल्लक्षणाऽजहल्लक्षणयोरसंभवः तस्माज्जहदजहल्लक्षणयाविरुद्धांशप
रित्यज्याविरुद्धाखण्डचैतन्यमात्रं लक्षयतीत्यन्वययोजना तत्र दृष्टान्तमाह ॥ ॥ राम ॥ ॥ रा०म० २७

यथेति यथा सोयं देवदत्त इति वाक्ये यथोक्तजहल्लक्षणाजहल्लक्षणयोरसंभवेन तदर्थस्य तत्कालतद्देशविशिष्ट
स्यैतत्कालैतद्देशविशिष्टदेवदत्तलक्षणवाक्यार्थस्यैकस्मिन्नंशे तत्कालैतत्कालवैशिष्ट्यभागे विरोधदर्शना
त्तत्परित्यागेनाविरुद्धदेवदत्तपिंडमात्रं लक्षयतीत्यर्थेन मानान्तरविरोधरहितकल्पनायेनेत्यर्थः उक्तमर्थं दार्ष्टांति
के योजयति तथेति तथा तत्त्वमसीत्यादिवाक्यस्यापि परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थ
प्रतिपादकत्वासंभवाज्जहदजहल्लक्षणया विरुद्धपरोक्षत्वादिवैशिष्ट्यांशपरित्यागेनाविरुद्धाखंडचैतन्यमात्रम्

तथा तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे
विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टांशं परित्यज्याविरुद्धमखंडचैतन्यमात्रं लक्षयतीति अथा
धुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते ॥ ॥

तिपादकत्वं तस्येत्यर्थः अखंडचैतन्यप्रतिपादकस्य तत्त्वमसीतिवाक्यस्यार्थं सप्रपंचमभिधायेदानीं यदनुभवे
ऽनुभववाक्यार्थो वर्ण्यत इत्याह अथाधुनेति गुरुमुखात्तत्त्वकृतः तत्त्वमस्यादिवाक्यश्रवणादिदार्ढ्यादहंकार
रानतदुपलक्षितसकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन परमात्मना सहैकत्वबोधानंतरं कस्मिंश्चिदधिकारी लब्धा
वसरं सर्वोपाधिविनिर्मुक्तं सच्चिदानंदैकरसमनुभवेन जिज्ञासुराचार्योपदिष्टमहं ब्रह्मास्मीतिवाक्यार्थमनुस
रन्स्वात्मानंदैकरसमनुभवतीत्यर्थः तत्प्रकारमेवाह ॥ ॥ ॥ ॥

वे·सा· एवमित्यादिना एवं संक्षेपेण प्रमाणप्रकारेणाधिकारिणः चित्तवृत्तिरुदेतीति संबंधः कदेत्यपेक्षायामाह आचा
टी· र्येणेति आचार्येण विक्षेपः संरोनिष्कलचैतन्ये पाशुभ्रसृगायमानाविद्याहंकारादिशरीरांतं मिथ्यापदार्थमध्यारो
२८ प्य तदपवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा तत्त्वमसीति वाक्येन जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाऽखंडा
28 र्थे चैतन्ये ज्ञाते सतीत्यर्थः किंविषयिणी चित्तवृत्तिरुदेतीत्याशंकां निवारयति अहमिति अहंप्रत्ययगम्यात्मा परंब्रह्मा
स्मीत्यन्वयः ब्रह्मानित्यत्वशंकां निराकरोति नित्येति शुद्धपदेनाऽविद्यादिदोषराहित्यं बुद्धपदेन स्वप्रकाशस्वरूप

एवमाचार्येणाध्यारोपअपवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेबोधितेधिकारिणः अहं
नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयंब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिरुदेति सा तु चित्प्र
तिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परंब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते ॥

त्वेन जन्मादिकं व्यवच्छिद्यते मुक्तपदेन सर्वोपाधिराहित्यं सत्यपदेनाविनाशिस्वभावत्वं परमानंदपदेन वैषयिक
मनुष्यानंदादिचतुर्मुखब्रह्मानंदपर्यंतानां कर्मजत्वेन सातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात्तेभ्यो विलक्षणं राम·
निरतिशयानंदस्वरूपत्वं प्रतिपाद्यते अनंतपदेन घटादिवत्सविच्छेदराहित्येन देशतः कालतो वस्तुतश्चापरिछिन्न ॥ २८

वे॰सा॰ एवमित्यादिना एवं संक्षेपेण प्रमाणप्रकारेणाधिकारिणः चित्तवृत्तिरुदेतीति संबंधः कुतेत्यपेक्षायामाह आचा
२॰ र्येणेति आचार्येण विधिपः संतोषितेन निष्कलचैतन्ये प्राप्तुं स्फुरणायमानाविद्यादिकारणादिशरीरांतमिथ्यापदार्थमध्येरो
२८ प्य तदपवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा तत्त्वमसीतिवाक्येन तज्जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाखंडा
४४ र्थचैतन्ये ज्ञापिते सतीत्यर्थः किंविषयिणी चित्तवृत्तिरुदेतीत्याशंकां निवारयति अहमिति अहं प्रत्यगात्मा परं ब्रह्मा
स्मीत्यन्वयः ब्रह्मानित्यत्वशंकां निराकरोति नित्येति शुद्धपदेनाविद्यादिदोषराहित्यं बुद्धपदेन स्वप्रकाशस्वरूप

एवमाचार्येणाध्यारोपअपवादपुरस्सरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेवबोधितेधिकारिणः अहं
नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिरुदेति सा तु चित्प्र
तिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते ॥

त्वेन जन्मादिकं व्यवच्छिद्यते मुक्तपदेन सर्वोपाधिराहित्यं सत्यपदेनाविनाशिस्वभावत्वं परमानंदपदेन वैषयिक
मनुष्यानंदादि चतुर्मुखब्रह्मानंदपर्यंतानां कर्मजन्यत्वेन सातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात्तेभ्यो विलक्षणं राम॰
निरतिशयानंदस्वरूपत्वं प्रतिपाद्यते अनंतपदेन घटादिवत्परिच्छेदराहित्यं नदेशतः कालतो वस्तुतश्चापरिच्छिन्न॥ २८

त्वंबोध्यते अद्वयमिति नानात्वनिषेधेनैकत्वंबोध्यत इत्यर्थः ननु यथा रविप्रभा आदित्यमंडलेन व्याप्तापि न च प्रयोजनमस्ति तथा नित्यशुद्धस्वप्रकाशमात्मानं ज्ञानवित्तवृत्तिरेकं कथं विषयीकुर्यादिति किंप्रयोजनं चैतन्याप्रकाशादू स्यादिति सा चित्तवृत्तिर्न शुद्धब्रह्मविषयिणी किंत्वज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी सा च चैतन्यप्रतिबिंबसंवलिता सती चैतन्यगतमज्ञानं निवर्त्तयति तस्याः चैतन्यावरकाज्ञाननिवृत्तिरेव प्रयोजनमित्यर्थः न

तदा पटकारणानां तंतूनां दाहे पटदाहवदखिलकार्यकारणेऽज्ञाने बाधिते सति
तत्कार्यस्याखिलस्य बाधितत्वात्तदंतर्भूताऽखंडाकाराकारिता चित्तवृत्तिरपि बा-
धिता भवति ॥ ॥

नधिकारिणः तत्त्वमस्यादिवाक्यश्रवणोत्पन्नाऽखंडचैतन्यवृत्त्या तदाश्रिताज्ञाने निवारितेऽपि तत्कार्यस्य सकलचराचरात्मकप्रपंचस्य प्रत्यक्षतया भासमानत्वात् कथमद्वैतसिद्धिरित्याशंक्य कारणाज्ञाननाशे तत्कार्यसकलप्रपंचनाशादद्वैतसिद्धिरित्येतत्सदृष्टांतमाह तदेति नन्वज्ञाननाशे तत्कार्यप्रपंचस्य नाशोऽस्तु तथाप्यखंडाकारवित्तवृत्तेरनिवृत्तेरद्वैतहानिरित्याशंक्याह तदंतर्भूतेति अखंडाकारवृत्तेरप्यज्ञानतत्कार्यांतर्भूतत्वात्तन्निवृत्त्यात

वे·सार· २९
29

ननु तथाप्यखंडाकारवृत्तिप्रतिबिंबितचैतन्याभासस्य सत्तात्कथमद्वैतसिद्धिरित्याशंक्याह तत्रेति वृत्तिनि
वृत्तौ तत्प्रतिबिंबितचैतन्यस्य बिंबाभासनासमर्थतया स्वोपाधिबाधेन तत्प्रतिबिंबचैतन्यमपि चैतन्यमात्रतया
वशिष्यते दर्पणोपाधिविगमे तत्प्रतिबिंबितमुखाभासस्य बिंबभूतमुखमात्रतावशेषवदित्यर्थः अथवा
वः शोधिततत्त्वंपदार्थस्याधिकारिणः तद्धितंभिन्नतद्गुरुशास्त्रादिभ्यः तत्त्वमसीत्युपदेशानंतरं अहं नित्यशुद्धबुद्ध
मुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीति चित्तवृत्तिरुदयमासादयति तदानीमेव तस्याभिव्यक्ताव
ऽचैतन्यबलेन समस्यरिपीडिताज्ञाननाशो भवति तदानीं तत्कार्यस्य सर्वस्य नाशादभिव्यंजकवृत्तिरपि स्वयमेव क
तकरजोवद्दाह्यमघनतृणनिताग्निवदुदरस्थदुष्टजलशोषार्थपीततन्मज्जलवच्च नष्टा भवति तदानीं तत्कृताभासो

तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयंप्रकाशमान
पिहितोपाधिभूतवृत्तिनाशात्स्वप्रकाशात्मावभासनासमर्थतया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठान
मुखमात्रत्ववदधिष्ठानमात्रो भवतीति वेदांतसिद्धांतरहस्यमिति अत्र तस्यानुभवः लोकाश्च भांति परमे मयि मो
हजन्याः स्वप्नेऽदृष्टालमल्लीरसमाविचित्राः मुक्तानकालहृदनस्फुरलविमुक्तप्रसत्यकल्पलताऽपरमामृतचिन्तवृ
त्तौ १ मनः परं तत्त्वलतु विश्वमृषापि भाति मध्ये च पूर्वमपरंतरभृंगतत्त्वं मायान्यशास्त्रगुरुवाक्यसमस्तबोधभा
नुप्रभाविलसितेऽकृतानंतज्ञाने २ निरतिशयसत्ताद्यौत्प्रकाशे परेस्मिन्कथमिदमविवेकाऽडाम्यतमकफणि
व कल्पनात्मपुनानदैशकोवाग्रतितोपरमविमलबोधमस्तु स्थितेऽहंनज्ञाने ३ ॥ ॥ ॥ राम·
२९

तदेतत्सर्वं मनसि निधायोपसंहरति प्रत्यगभिन्नेति ननु मनसैवानुद्रष्टव्यं नेदृष्टव्यं मनसैवेदमाप्त
व्यं दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः बुद्ध्यालोकतत्साध्ये सिद्धन्स्त्वमस्त्वमितापदि बुद्धियोग
मुपाश्रित्य मच्चित्तः सततं भवेत्यादिश्रुतिस्मृतीनां यतो वाचो निवर्तन्ते अप्राप्य मनसा सह यन्मनसा न म

वे १

प्रत्यगभिन्नपरब्रह्मावभासनानर्हत्वयातेनाभिभक्तत्वंसत्स्वोपाधिभू
तान्तःकरणेतेवीथिनतादृष्टीणाभावेप्रत्यविवस्यमात्वमात्रत्वव
त्प्रत्यगभिन्नपरब्रह्ममात्रं भवति एवं सन्निमनसैवानुद्रष्टव्यं यन्म
नसा न मनुत इत्यनयोः श्रुत्योरविरोधः ॥ ॥ ॥

नुते अमदेव तद्विदितादथो अविदितादधीति अविज्ञातं विजानतां विज्ञातमविजानतां अनाधिनो ऽथ मे
यस्य यद्विज्ञानतया विप्रपन्नविज्ञानमात्मना ताभ्यामस्य मतं विहितं यद्यं तज्ज्ञ इत्यन्नमित्यादिश्रुतिस्मृती
नां परस्परविरोधमाशंक्य परिहरति एवमिति एवमुक्तप्रकारेण अज्ञातचैतन्यस्य सहज्ञप्तिव्याप्यत्वांगी
कारेण फलव्याप्यत्वप्रतिषिद्धमतीत्यर्थः ॥

वे. सार. तदेवाह वृत्तिव्याप्यत्वेति अंतःकरणवृत्तिर्ब्रह्मणि निहत्यर्थमज्ञानावच्छिन्नं चैतन्यं व्याप्नोतीत्येतद्वृत्ति
३० व्याप्यत्वमंगीक्रियते आवरणभंगानंतरं स्वयंप्रकाशमानचैतन्यं फलचैतन्यमित्युच्यते तस्मिन्फला
30 चैतन्ये निष्फलत्वे चित्तवृत्तिर्न व्याप्नोति आवरणभंगस्य प्रागेव सिद्धत्वेन प्रयोजनाभावादित्यर्थः अ
न्वयं ग्रंथांतरं संवादयति तदुक्तमिति वृत्तिप्रतिबिंबितचैतन्याभासस्यापि फलचैतन्यप्रकाशकत्वेनेस
नापि संमतिमाह स्वयमिति इदानीं जडपदार्थविषयकचित्तवृत्तेर्ब्रह्माकारवृत्त्यपेक्षया वैलक्षण्यं दर्शि

२

वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादकत्वात् तदुक्तं फलव्याप्यत्वमेवास्य
शास्त्रकृद्भिर्निवारितं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति स्वयंप्रकाशमानत्वान्नाभा
स उपयुज्यते इति जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति

चित्तमाह जडपदार्थेति अयं ब्रह्मास्मीति
ज्ञानावच्छिन्नब्रह्माकाराचित्तवृत्तिस्तदावरकमज्ञानमात्रं निवर्तयति ब्रह्म तु स्वप्रकाशात्मत्वात्स्वयमेव
प्रकाशते ननु वृत्तिप्रतिबिंबितचिदाभासेन चैतन्यं प्रकाशते न ब्रह्मतस्यासामर्थ्यात् अयं घट इति घटा
कारितचित्तवृत्तिस्तु घटावरकं किल चैतन्यावरकमज्ञानं निवर्त्य निवर्तमानायां प्रतिबिंबितचिदाभा
सेन जडं घटमपि प्रकाशयति अतः ततो विशेषोऽस्तीत्यर्थः एतदेव प्रपंचयितुं प्रतिजानीते ॥ ॥ सम.
१

तथाहीति जडपदार्थविषयिणीं चित्तवृत्तिमभिनीय दर्शयति अयमिति वृत्तिसंबंधात्प्रागज्ञातत्वादज्ञात
त्वात् अज्ञातमेव घटं विषयीकृत्य स्ववृत्त्या चित्तवृत्तौ घटगताज्ञानं दूरीकरणेन घटमपि भासयतीत्यर्थः अस्मि
न्नर्थे वृद्धसंमतिमाह तदुक्तमिति बुद्धिश्च तत्र बुद्धौ प्रतिबिंबितचिदाभासश्च बुद्धितत्स्थचिदाभासौ
द्वावेतौ बुद्धिचिदाभासौ घटं व्याप्नुतः तत्र तयोर्मध्ये धिया वृत्त्या घटगताज्ञानं नश्येच्चिदाभासेन तु घटः स्फुरे
दित्यर्थः अत्रैव दृष्टान्तमाह यथेति यथान्धकारावस्थितं घटादिकं विषयीकृत्य प्रवर्तमानं दीप

तथाहि अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिर
सनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति तदुक्तं बुद्धितत्स्थचिदाभासौ द्वावपि
व्याप्नुतो घटं तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् यथा दीपप्रभामण्डलमन्धकारगतं
घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति एवंभू
तस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्ते

प्रभामण्डलं घटपटावरकान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति तद्वदित्यर्थः इयता ग्रन्थजा
लेन प्रतिपादितस्य प्रत्यगभिन्नपरमात्माखण्डचैतन्यस्य साक्षात्कारलक्षणमखण्डाकारान्तःकरणवृत्तिं प्रति
पिपादयिषुः तत्साधनभूतश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणानि च मेलादर्शयति एवंभूतेत्यादिना
अद्वैतं वस्तुभासनतः त्वमनेन ग्रन्थेन एवंभूतेति एवंभूतस्योक्तप्रकारेणानुभवैर्निरस्तसमस्तोपाधिपरम

वे.सार. नत्वश्रवणस्यलक्षणमाह षड्विधेति लीनमर्थंगमयतीतिलिंगं लिंगशब्दस्यव्युत्पन्नत्वे· तथ्यात्मैकत्वनिश्चाय
३१ कैरुपक्रमोपसंहारादिषड्विधलिंगैः सर्वेषांवेदान्तवाक्यानामद्वितीयेब्रह्मणितात्पर्यनिश्चयः श्रवणमित्य
31 र्थः तानिचलिंगानिक्रमेणोपदिशति उपक्रमेति तथाचोक्तं उपक्रमोपसंहारावभ्यासोऽपूर्वताफलंअर्थवा

श्रवणंनामषड्विधलिंगैरशेषवेदान्तानामद्वितीयवस्तुनितात्पर्यावधारणं लिंगानितु उपक्रमो
पसंहारावभ्यासोऽपूर्वताफलंअर्थवादोपपत्त्याख्यानि प्रकरणप्रतिपाद्यस्यार्थस्यतदाद्यन्तयोरुप
पादनमुपक्रमोपसंहारौ यथाछान्दोग्येषष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः एकमेवा
द्वितीयमित्यादौऐतदात्म्यमिदंसर्वमित्यन्तेचप्रतिपादनं प्रकरणप्रतिपाद्यस्यतन्मध्येपौनःपुन्येनप्रतिपा
दनमभ्यासः यथातत्रैवाद्वितीयवस्तुनोमध्येतत्त्वमसीतिनवकृत्वःप्रतिपादनं प्रकरणप्रतिपाद्य

दोपपत्तीचलिंगंतात्पर्यनिर्णये इति उपक्रमोपसंहारौतावद्दर्शयति प्रकरणप्रतिपाद्यस्येति तद्दर्शनमुदा
हरति यथेति एकमेवाद्वितीयमित्युपक्रमः ऐतदात्म्यमिदंसर्वमितिप्रतिपादनमुपक्रमोपसंहारावित्यर्थः
अभ्यासस्यलक्षणमाह पौनःपुन्येनेति अयापिप्रसिद्धिनिमदाद्दर्शयति यथेति अपूर्वत्वस्यलक्षणमाह ॥ ३ ॥ रामः ३१

प्रमाणान्तरेणेति तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वं ना-
मित्यर्थः अथवा ब्रह्म स्वप्रकाशत्वेन स्वव्यवहारे स्वातिरिक्तप्रमाणानपेक्षत्वाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः क्रमप्रा-
प्तस्य फलस्य लक्षणमाह फलं त्विति अत्रानुरूपमुदाहरणमाह आचार्यवानित्यादि श्रवणादिसाधनानां
ब्रह्मात्मैकत्वविज्ञानं प्रयोजनं ब्रह्मज्ञानस्य तु तत्प्राप्तिः फलं ब्रह्मविद्ब्रह्मैव भवति तरति शोकमात्मवि-

प्रमाणान्तराविषयीकरणमपूर्वता यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणं फलं तु
प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्राचार्य-
वान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्ति
प्रयोजनं श्रूयते प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः यथा तत्रैवोत तमादेशमप्राक्ष्यो
येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति

दित्यादिश्रुतेरित्यर्थः पंचमलिंगस्यार्थवादस्य लक्षणमाह प्रशंसनमिति प्रकरणप्रतिपाद्याद्विती-
यब्रह्मस्वरूपस्तावकवाक्यमर्थवाद इत्यर्थः अत्रापि श्रुतिमाह उत तमादेशमप्राक्ष्य इत्यादि येनाश्रुतं
श्रुतं भवति येन सकलप्रपंचाधिष्ठानब्रह्मस्वरूपश्रवणेनाश्रुतं प्रपंचजातमपि श्रुतं भवति येन ब्रह्म-
ज्ञानेनाज्ञातं सर्वं जगज्ज्ञातं भवति येन ब्रह्मसाक्षात्कारेण साक्षात्कृतं भवति ब्रह्मणः सर्वतः संप्लु-

वे॰सा॰ ३२

अवशिष्टयाउपपत्तेर्लक्षणमाह युक्तिरिति तामुदाहरति यथेति मृत्तिकोरखघटादिषु विकारना
मधेययोर्वाचारंभणमात्रत्वेन यथा मृन्मयत्वमेवावशिष्यते॰ नान्यत्तथा चिद्विवर्तस्य प्रपंचस्यागिरि
नदीसमुद्रात्मकविकारनामधेययोर्वाचारंभणमात्रत्वाच्चिन्मात्रमेवावशिष्यते रज्जुविवर्त
सर्पस्य रज्जुमात्रावशेषवदित्यर्थः श्रवणनिरूपणानंतरं तदनुगुणं मननं तस्य लक्षणमाह
मननंत्विति षड्विधलिंगतात्पर्यकस्य तस्याद्वितीयब्रह्मणो वेदांताविरोधिनीभिर्युक्तिभिर्नैरं

अद्वितीयवस्तुप्रमेयसंशयनिराकरणप्रतिपादनार्थमाप्यनेनतत्रोच्यमानायुक्तिरुपपत्तिः तत्र
यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्ये
व सत्यमित्यादावद्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिः श्रूयते मननं
तु श्रुतस्याद्वितीयवस्तुनो वेदांतार्थानुगुणयुक्तिभिरनवरतमनुचिंतनं विजातीयदेहा
दिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनं समाधिर्द्विविधः सवि

तयोर्मननुचिंतनं मननमित्यर्थः निदिध्यासनस्य लक्षणमाह विजातीयेति विजातीयदेहादिबुद्धे
र्जडपदार्थविषयकप्रत्ययनिराकरणेन सजातीयाद्वितीयवस्तुविषयकप्रत्ययप्रवाहीकरणं नि
दिध्यासनमित्यर्थः श्रवणादिसंस्कारपरिपाकभवप्रादुर्भावे सति चित्तस्यैकाग्रतापरिणामः स
माधिः स च द्विविध इत्याह सविकल्पको निर्विकल्पकश्च तस्य लक्षणमाह ॥ राम ॥

राम॰ ३२

तत्रे तत्र तयोः सविकल्पकनिर्विकल्पयोर्मध्ये सविकल्पकोऽपि द्विविधः अहं ब्रह्मास्मीति शब्दानुविद्ध
तया द्वितीयेव स्तुनि चिद्रूपेऽवस्थानमित्येकः द्वितीयस्तु ज्ञातृज्ञानज्ञेयत्रिपुटीविलयानपेक्षया अहं ब्र
ह्मास्मीति शब्दानुविद्धतया द्वितीयवस्तुन्यविवेकेन चिद्रूपेऽवस्थानमित्यर्थः ननु भक्तित्वेऽपि तस्य
नैन शांतो ध्याथिरिति न्यायेनोक्तसविकल्पकसमाधेः सकलभेदनिराकरणापर्यवसानाद्योरपि।
ज्ञात्रादिभेदविषयत्वेन नाद्वैतवस्तुमात्रभानं तत्रेत्याशंक्योत्तरमाह तद्वेति तदा सविकल्पकसमाध्य

तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पभेदलयापेक्षया द्वितीयवस्तुनि तदाकाराकारिता
याः चित्तवृत्तेरवस्थानं तदा मृण्मयगजादिभाने मृद्भानवत् द्वैतभानेऽप्यद्वैतवस्तु भासते ॥

नुभवकाले ज्ञात्रादिभेदप्रतीतावप्यद्वैतवस्तुभासत एव सुवर्णमयकुंडलादिभाने सुवर्णभानवन्मृण्म
यगजादिभाने मृद्भानवच्च गजादिभानस्य वाचारंभणमात्रत्वात् ज्ञात्रादिभानस्यापि वाचारंभणमात्रत्वादद्वै
तमेव वस्तु भासत इत्यर्थः यद्वा सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वमित्यादिश्रुत्यवलम्बनेन मदृष्टि
रितदीसमन्यदात्मके सर्वं जगत् ब्रह्माभिन्नसच्चिदानंदब्रह्मत्वेनानुभूयत इत्यध्यायेन प्रपंचभानेऽप्यद्वै
तं सच्चिदानंदलक्षणं वस्तु भासत एवेत्यर्थः ॥

म

वे.सा.र. तदुक्तं भगवता वासुदेवः सर्वमिति सर्वात्मा सुदुर्लभ इति सत्त्वकारोपाख्यानं ध्येयं ध्यानतरं समस्तं पति

३३ तदुक्तमिति ओमिति यत्परं ब्रह्म तदेवाहमित्यन्वयः किं तदित्यत आह दृशिस्वरूपमिति दृशिः दृष्टिः ज्ञानं स्वरूपं यस्य

तेन ज्ञप्तिमात्रपरमात्मस्वरूपस्य तद्दृशिस्वरूपमित्यर्थः तदुक्तं भगवता उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः प

33 रमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः पर इति पुनः किंरूपं तत् गगनोपमं गगनेनोपमा दृष्टान्तो यस्य तद्गगनो

पमं गगनवन्निर्लेपस्वरूपमित्यर्थः तथा च भगवद्वचनं यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्व

त्रावस्थितो देहे तथात्मा नोपलिप्यत इति यद्वा गगनोपमे गगनमदमतत्स्वरूपमित्यर्थः आकाशश

तदुक्तं दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं
विमुक्त ओमिति

रीरवस्त्विति श्रुतेः पुनः किं सकृद्विभातं सकृदेकदैव विभातं सर्वदैकस्वरूपेणावभासमानं चन्द्रादि

प्रकाशवत्न ह्रासवृद्धिशीलमित्यर्थः पुनः किंरूपं अजं जन्मरहितं एकं निरस्तसर्वोपाधिभेदं अक्षरं वि

नाशापचयरहितेन कूटस्थस्वरूपमित्यर्थः तथा च भगवानाह क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यत इ

ति अलेपकं असंगत्वादविद्यादिलेपरहितमित्यर्थः असंगो ह्ययं पुरुष इति श्रुतेः सर्वगतं सर्वत्र ब्रह्मादि

स्थावरान्तेषु भूतेषु गतं व्याप्य अद्वयं सजातीयविजातीयभेदरहितेन द्वितीयरहितं सततं विमुक्तमिति सर्व

दा कार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततैकरूपमित्यर्थः तथा च भगवते बद्धो मुक्त इति व्याख्या

राम
३३

निर्विकल्पकसमाधिस्वरूपमाह निर्विकल्पकस्त्विति अयं च द्वितीयः चिरकालाभ्यस्तपटुतरसविकल्पक
समाध्यनुभवजनितसंस्कारसहकृतायाः चित्तवृत्तेर्ज्ञात्राद्यत्रिपुटीलयपूर्वकमद्वैतवस्तुन्येकभावेनाव
कः प्रथमः एतन्निर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्राद्यत्रिपुटीलयपूर्वकमसंस्कृत
कारितायाः चित्तवृत्तेर्विनापि स्वरूपेणैकेवलविषयत्वं सदात्मनावस्थानमात्मकोऽद्वितीयः तत्राद्वितीयपदतम
भिप्रेत्याह ज्ञातृज्ञानादीति नन्वेवं समाधिसुषुप्त्योर्विशेषाभावेन वृत्त्यभानादभेदमाशङ्क्य परिहरति तदेति

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पभेदलयापेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानं तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवत् अद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः आसनानि करचरणादि

ध्येति तत्र युक्तिमाह उभयत्रेति समाधिसुषुप्त्योरित्यर्थः तत्सद्भावेति समाधावज्ञायमानवृत्तिसद्भावस्तु
सुषुप्तौ वृत्त्यभावाच्च तयोर्भेदोपपत्तेरित्यर्थः उक्तसमाधेः साधनापेक्षायामाह अस्येति तानि च साधनानि क्र
मेणोद्दिशति यमेति यमाद्यष्टाङ्गानि समाधेरन्तरङ्गसाधनानीत्यर्थः प्रथमयमस्य लक्षणमाह तत्रेति तत्र

वै·सा प्राणायामलक्षणमाह रेचकेति । इडया पूरयेद्वायुं रेचयेत्पिङ्गलानिलं यावत्स्वाङ्गे समासीनः कुंभयेत्तं सुषु-
र· म्णया यद्वा योगी पद्मासने स्थितः विपरीतयोगसम्भवस्थानितत्रागउत्थाप्यो गदकुण्डलिनिः पीत्वा खेचरीमुद्रासहायेन प्राण-
३८ धारणया सुषुम्णामार्गेण मूलाधारात्कुण्डलिनीं स्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञानिर्वाणाख्य
34 षट्चक्रभेदक्रमेण सहस्रदलकमलकर्णिकायां विद्यमानपरमात्मना सह संयोज्य तत्रैव चित्तं निर्वातदीपव-
न्निश्चलं कृत्वा स्वात्मानं दृष्ट्वा पिबतीमतः प्राणायामफलं स च द्विविधः अगर्भः सगर्भश्चेति रेचयेद्दक्षिणया वायुं
मात्राहीनमनन्यधीः पूरयेद्वाम यातः कुंभयेत्सुषुम्णया यावत्स्वासजितः स्वासो अवेत्मात्राशालिनीतिद्विधः इति
रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ॥ ॥ ॥
वचनात् प्रणवोच्चारणाद्विना उक्तरेचकपूरककुंभकक्रमेण प्राणनिरोधोऽगर्भप्राणायामः रेचयेत्सो
ऽहमित्येव तद्वेदिगणेन पूरयेत्कुंभयेत्स्वचतः षष्ठं प्रणवार्थमनुस्मरन् इति वचनात् सोऽहं प्रणवं मनसा जप
न्दक्षिणया वायुं विरेचयेद्वामविंशत्यक्षरात्मकप्रणवं मनसा स्मरन्वामया वायुमापूरयेच्चतुःषष्टिसंख्याकं प्रण
वं मनसा जपन् तदर्थं च अकारोकारमकारार्धमात्रात्मकसार्धत्रिमात्रात्मकसार्धत्रिवलयाकारकुण्डलिनीरूपं चि
न्तयन्नेकैकं च मूलादिब्रह्मरन्ध्रान्तमनुसंदधत्सुषुम्णया चित्तमणितदेकप्रवणं कुर्वन्यावच्छक्यं कुंभयेत् तदुक्त
मार्यैः सोऽहं स्यात्तद्विगगवदष्षष्टिमात्राभिश्चतानि च क्रमशः रेचकपूरकपूरककुंभकभेदैः त्रिविधः सगर्भं तना
यामः इति प्राणायामप्रकारः क्रमप्राप्तं प्रत्याहारं विनिरूपयति ॥ ॥ ॥ राम·
३८

इंद्रियाणामिति श्रोत्रादीनामिंद्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशात्तत्ताषाणो परिप्रयुक्तः प्र
त्यसचातः तद्दृत्तावर्तनं प्रत्याहारः नत्विंद्रियाणां स्वस्वविषयेभ्यो निवर्तनं प्रत्याहारस्त्वुक्ते तत्त्वसंभ
वति शब्दादिविषयाणां स्वास्वसाधनत्वेन वैषयिकसुखव्यतिरिक्तनिरतिशयानंदसद्भावप्रमाणाभा
वादिंद्रियाणामधीयस्तदभोगसेस्वरेणापि तत्क्रमशक्यत्वादिति चेत् न सर्वैः कर्मजैर्विषयलंपटैः प्र
क्रमशक्यत्वेपि मुमुक्षुभिः तःकरणेन संसारविषयकत्वदर्शिना विषयदोषदर्शनेन तुच्छीकृतशब्दादिवि
षयप्रपंचेन पुरुषोत्तमेन पुरीषवत्तत्क्रमशक्यत्वात् अन्यथासंन्यासावलोलखेततस्मात्सामेषां
तपसामतिरिक्तमाहुः एतमेवलोकमभीप्सन्तः प्रव्राजिनः प्रव्रजंति एतत्सर्वैर्भूः स्वादेः स्यस्यपरित्य

इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः

ज्यात्मानमविच्छेतनकर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः ब्रह्मचर्यादेव प्रव्रजेत् यदहरे
व विरजेत्तदहरेव प्रव्रजेत् वनाद्वा गृहाद्वा सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति संसारमेवनिःसारं दृष्ट्वा सा
रदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः ब्रह्मावाप्त्यै व
तत्त्यागं ईप्संतीति श्रुतेर्बलात्स्तोत्रिय्यति स्मृतिभिः तथा आनंदो ब्रह्मेति व्यजानात् एतस्यैवानंदस्यान्या
नि भूतानि मात्रामुपजीवंतीति एषोस्य परमानंदः आत्मैवानंदः यदेष आकाश आनंदो न स्यात् आनंदाद्ध्येव
खल्विमानि इत्यादि श्रुतिभिः श्रुतिस्मृतिन्यायसंप्रतीपादितत्वाच्छब्दादिवैषयिकसुखव्यतिरिक्तनिरतिशयानंद
सद्भावप्रमाणाभावादित्येतदपि निरस्तं वेदितव्यं ॥ ॥

वे॰सा ६५ 35

संप्रति धारणां लक्षयति अद्वितीयवस्तुनीति सर्वेषां बुद्धिप्राप्तितया विद्यमाने वस्तुनि चित्तनिक्षेपणं धारणा-
र्थः धारणापाटवाभावेन चित्तस्थैर्याभावादद्वितीयवस्तुनि विच्छिद्य चित्तवृत्तिप्रवाहीकरणं ध्यानमित्याह तत्रे-
ति समाधिस्तूक्त एव सविकल्पकः स्मर्तव्य इत्याह समाधिरिति उक्तयमाद्यष्टांगसहितनिर्विघ्नानुष्ठानसिद्धये
विघ्नान्व्यतिरेकेण निवारणस्य कर्तुमशक्यत्वादस्य चत्वारो विघ्नान्दर्शयति अस्येति तत्राद्यं विघ्नं लक्षयति

अद्वितीयवस्तुन्यंतरिंद्रियावधारणं धारणा तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यांतरिंद्रियवृत्ति-
प्रवाहो ध्यानं समाधिस्तूक्तः सविकल्पक एव अस्यांगिनो लयविक्षेपकषायरसास्वादलक्षणा-
श्चत्वारो विघ्नाः संभवंति लयस्तावदखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा ॥ ॥ ॥

लयस्तावदिति लयो द्विविधः चिरकालमनुष्ठानाद्यष्टांगसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितमलोद्ग-
तलहिमजलविंदुवत्तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमानंदे चित्तवृत्तेर्लयः प्रथमः द्वितीयस्तु मूर्छा-
वस्थावत् आलस्येन चित्तवृत्तेर्वीप्रशब्दादिविषयग्रहणनादरे सति प्रत्यगात्मतत्त्वरूपानवभासनाद्वृत्तेर्मंदी-
भावलक्षणो निद्रारूपः तत्राद्यमंगीकृत्याद्वितीयस्य विघ्नत्वेन तत्त्यागाय तत्स्वरूपमाह लयस्तावदिति द्विती-
यं विघ्नमाह ॥ ॥ ॥ ॥ ॥

अखंडेति अखंडवस्तुग्रहणायांतर्मुखतया प्रवृत्तायाः चित्तवृत्तेः चिदनवलंबनेन तत्स्फूर्तिवस्तुनवाश्रवि
षयग्रहणाय प्रवृत्तिर्विक्षेप इत्यर्थः ततीयं विघ्नमाह लयेति रागादयः त्रिविधाः बाह्याभ्यंतराः वासनामा
त्ररूपाश्चेति बाह्याः पुत्रादिविषयाः आभ्यंतरा मनोराज्यादयः संस्काररूपा वासनामयाः तत्रानेकजन्माभ्यस्त
बाह्याभ्यंतररागादायत्वभवजनितसंस्कारैः कलुषीकृतं चित्तं कथं चिच्छ्रवणादिसाधनेनांतर्मुखमपि चेत्तस्य
ग्रहणसामर्थ्याभावात्स्तब्धीभवतीति यथा राजदर्शनाय स्वगृहान्निर्गतस्य राजमंदिरप्रविष्टस्य कस्यचि
त्पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्तबाह्यविषयस्याखंडवस्तुग्रहणाय प्रवृत्तस्य चित्तस्यो

अखंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासन
या स्तब्धीभावादखंडवस्त्वनवलंबनं कषायः अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः सविकल्पकानं
दास्वादनं रसास्वादः ॥

दुष्टरागादिसंस्कारैः स्तब्धीभावादखंडवस्तुग्रहणं कषाय इत्यर्थः चतुर्थं विघ्न
माह अखंडेति उक्तसविकल्पकसमाध्योर्मध्ये द्वितीयो शब्दानुविद्धः त्रिपुटीविशिष्टः तस्मिन्नानंदो बाह्य
शब्दादिविषयप्रपंचभावत्यागप्रयुक्तो न तु चैतन्यप्रयुक्तः यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूत
प्रेतादावृत्तस्य निधिप्राप्त्यभावेऽपि भूतादिनिवृत्तिनिवृत्तिमात्रेणाकोऽपि महानानंदो भवति तद्वत्सविकल्पकसमा
धावखंडवस्त्वनवलंबनेन निरानंदरसास्वादनाभावेऽपि द्वैतबाह्यप्रपंचनिवृत्तिजन्यानंदं सविकल्परूपं स्वानंदं
भ्रमेणास्वादयतीति रसास्वादनमित्यर्थः ॥ ॥

वे.सा. लक्षणांतरमाह समाधीति निर्विकल्पकसमाध्यारंभकालेऽनुभूयमानसविकल्पकानंदस्यास्वादस्तु तयापु
१९ नः तस्यैवास्वादनं रसास्वाद इत्यर्थः प्रोक्तविघ्नचतुष्टयनिवृत्तेः फलमाह अनेनेति लयादिविघ्नाभावसहितंचि
त्तं यदा निर्वातदीपवदचलमखंडचैतन्यमात्रमवतिष्ठते तदा निर्विकल्पसमाधिरित्यर्थः लयादिविघ्नसद्भावे तन्नि
36 वृत्तिप्रकारं च वृद्धसंमतिमाह तदुक्तमिति पूर्वोक्तनिद्रालक्षणे लये जाते सति तन्निवृत्त्यर्थं चित्तं संबोधयेत चित्तगा
तज्जाड्यादिपरित्यागेन चित्तमुद्बोधयेत उक्तविक्षेपयुक्तं चित्तं यदा भवति तदा विषयवैराग्यादिना चित्तं शमयेत

समाध्यारंभसमयसविकल्पकानंदास्वादनं वा अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं
२ सदखंडचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकसमाधिरुच्यते तदुक्तं लये संबोधयेच्चित्तं विक्षिप्तं
शमयेत्पुनः सकषायं विजानीयात्समप्राप्तं न चालयेत ॥ ॥ ॥ ॥

बहिर्मुखतां परित्यज्यांतर्मुखं कुर्यात उक्तरागादिकषायसहितं चित्तं यदा भवेत्तदा विजानीयादियं रागादिवास
नावासविषयप्रापिका नत्वखंडवस्तुप्रापिका अतोनेयं समीचीनेति विविच्य प्रत्यक्प्रवणा वासनायाः सकाशादि
यं निकृष्टा तस्माज्ज्ञेयमिति विजानीयादित्यर्थः यदा समखंडवस्तुसमप्राप्तं चित्तं यदा भवति तदा तच्चित्तं कषायसहितं ज्ञा
नीयात्तच्च चित्तं यावता कालेन रागादिवासनारहितं भवति तावत्कालं तच्चित्तं स्वस्थानान्न चालयेद्वासनारा
हित्यानंतरं चित्तं स्वत एव प्रत्यक्प्रवणं भवतीत्यर्थः ॥ ॥ ॥ राम:
१९

नास्वादयेदिति एवं सविकल्पकसंविषयप्रपंचभारत्यागजन्यं नास्वादयेत्तान्न भवेन्नव बुद्धिमान्
निःसंग इति यतो निःसंगो वैषयिकसुखदुःखादिसंगरहितः अतः प्रज्ञया युक्तो भवेत् स्थिरप्रज्ञो भवेदित्य
र्थः तदुक्तं भगवता प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदो
च्यत इति तस्माल्लयादिविघ्नाभावविशिष्टचित्तस्य चिन्मात्रतयावस्थानं निर्विकल्पकसमाधिरित्यर्थः
नन्वत्र भगवानाह यथेति अथ निर्विकल्पकसमाधौ स्वगुरूपदिष्टमार्गेण यथा मतिः किं विशिष्टा चार्यते पं
चभूमिकोपेतस्य चित्तस्य भूमिकात्रयपरित्यागेनावशिष्टं भूमिकाद्वयं समाधिरित्युच्यते कास्ताः पं

नास्वादयेत् रसं तत्र निःसंगः प्रज्ञया भवेदिति यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेति

चभूमिकाः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धं चेति पंच चित्तभूमिकाः तत्रासुरसंपल्लोकशास्त्रदेहवास
नासु वर्तमानं क्षिप्तमित्युच्यते निद्रातन्द्रादियस्तं चित्तं मूढमित्युच्यते कदाचिद्ध्यानयुक्तमपि बहि
र्गमनशीलं तु कदाचित् स्थिरं तदपि विक्षिप्तमिति चित्तमित्युच्यते तत्र क्षिप्तमूढयोः समाधिशंकैव नास्ति वि
क्षिप्ते तु चेतसि विक्षेपांगतया वह्न्यन्तर्गतबीजवच्छिन्नस्य समाधिरेव विनाशात् न दापित समाधिः एकाग्रता
पतंजलिः सूत्रयति शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणाम इति अस्यार्थः शान्तोऽतीतः उदितो वर्त
मानः प्रत्ययः चित्तवृत्तिरतीतवर्तमानप्रत्ययौ भवतः अतीतप्रत्ययो यत्पदार्थविषयस्तावदुदितोऽपि तमेवेतरत्

॥ राम ॥ राम ॥

क्षीयमाणत्वात्तावुभौ तुल्यौ भवतः तादृश एव चित्तस्य परिणामः यत्काले मनसः प्रकाशतामभिर्बहिर्लक्षणं स
माधिं स्ववयति सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति रजोगुणेन चाञ्चल्यमानं चित्तं क्र
मेण सर्वानर्थान्गृह्णाति तस्य रजोगुणनिरोधाय क्रियमाणेन प्रयत्नविशेषेण दिने दिने यो
गिनः सर्वार्थता क्षीयते एकाग्रता चोदेतीति तादृशः चित्तस्य परिणामः समाधिरित्यर्थः अस्य समाधेरङ्गे
षु यमनियमासनप्राणायामप्रत्याहाराः पञ्च बहिरङ्गानि हिंसादिभ्यो निषिद्धेभ्यो योगिनः कर्मभ्यो यमय
ति निवर्तयन्तीत्यहिंसादयो यमाः जन्महेतोः काम्यधर्मान्निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयन्तीति प्रे
रयन्तीति शौचादयो नियमः यमनियमयोरनुष्ठानं वै तल्लक्षणे स्मर्यते यमान्सेवेत सततं न नित्यं नियमान्
बुधः यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन्निति बुद्ध्या यमनियमौ सम्यक् सबहुकालं प्रयतते
शुद्धिमनुसंदधीत आसनप्राणायामप्रत्याहाराः व्याख्याताः ध्यानधारणासमाधित्रयं मनोविषयता
त्सम्प्रज्ञातसमाधेरन्तरङ्गं यमादिकं तु बहिरङ्गं तथा चकेनापि पुन्येनान्तरङ्गे प्रयत्नो मन्तव्यो सति बहिरङ्गला
भाय नातिप्रयासः कर्तव्यः अथ ध्यानेनाक्षिर्भौतिकमन्त्रजन्मादेरिन्द्रियादेकार्यविषयः संप्रज्ञातस
माधयो बहुधा प्रपञ्चिताः तथापि तेषामन्तर्धानाकाशगमनादिसिद्धिहेतुतया मुक्तिहेतुसमाधि
विरोधित्वान्नास्माभिः तत्रादरः क्रियते तथा चोक्तं वाशिष्ठे श्रीरामउवाच जीवन्मुक्तशरीराणां कथमा
त्मविदां वर शक्तयो नेह दृश्यन्ते आकाशगमनादिकाः श्रीवशिष्ठउवाच अनात्मविदमुक्तोऽपि सिद्धि

॥ जालानिवां ॥

कति द्रव्यमंत्रक्रियाकालयुक्त्याभोक्तैवराचव नात्मजस्यैवविषयश्चात्मनोयात्मनात्मरक्ष आत्मना
त्मविसंतुष्टोनाविद्यामनुप्रावति येकेचनजगद्भावः नानविद्यामयानिद्रः कथंतेषुकिलात्मज्ञःआ
ज्ञः विद्योनिमज्जति द्रव्यमंत्रक्रियाकालयुक्तयः साधुसिद्धिदाः परमात्मपदप्राप्तौनोपकुर्वंति
कांक्षानेति आत्मविषयस्तुसंप्रज्ञातसमाधिर्वासमात्तयस्यनिरोधसमाधेश्छेदनः तस्मात्तत्रादरः
कृतः अथपंचमभूमिकारूपः चित्तस्यनिरोधलक्षणः समाधिर्निरूप्यतेतंवसमाधिंसूत्रयति
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौनिरोधक्षणचित्तान्वयोनिरोधः परिणामइति व्युत्था
नसंस्काराः समाधिविरोधिनः तेचतिरोधहेतुनायोगिप्रयत्नेनप्रतिदिनंप्रतिक्षणंचाभिभूयंते
तद्विरोधिनश्चनिरोधसंस्काराः प्रादुर्भवंति तथासतिनिरोधएकैकस्मिन्क्षणेचित्तमनुगच्छ
तिसोयमीदृशः चित्तस्यपरिणामोभवति यद्यानक्षाः संप्रज्ञातसमाधिरुच्यतइत्यर्थः एतत्समा
धिद्वयंजीवन्मुक्तस्यैवभवति॰नान्यस्येति॰मनसिनिधायजीवन्मुक्तस्यस्वरूपंप्रतिपादयितं

॥ प्रतिजानीते ॥

॥

वे॰सार॰ २२ 38

अथेति तस्य लक्षणमाह जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यन्तेन जीवन्मुक्तो नामेति अखिलबन्धरहितो ब्र
ह्मनिष्ठो जीवन्मुक्त इति तस्य लक्षणं जीवतः पुरुषस्यैहिककर्तृत्वभोक्तृत्वसुखदुःखलक्षणाखिलो यः चित्तधर्मः स
क्लेशरूपत्वाद्बन्धो भवति तेन रहितः परित्यक्तबन्धनः ब्रह्मणि निष्ठा तदेकपरता यस्य स ब्रह्मनिष्ठः जीवन्मुक्त इत्य
र्थः सकलबन्धराहित्ये हेतुमाह स्वस्वरूपेति गुरुश्रुतिस्वानुभवब्रह्मात्मैकत्वविज्ञानेन मूलाज्ञानतत्कार्यसं
चितकर्मादीनामपि बाधितत्वात्सर्वसंशयाः क्षीयन्त इति तथा च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षी

अथ जीवन्मुक्तस्य लक्षणमुच्यते जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्व
रूपाखण्डे ब्रह्मणि साक्षात्कृते ज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबं
धरहितो ब्रह्मनिष्ठः अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन स्थूलशरीरेणान्ध्यमां
द्यापटुत्वादिभाजनेनेन्द्रियग्रामेणाशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च पू
र्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधित

यन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति ननु एतादृशस्य जीवन्मुक्तस्य देहेन्द्रियादिभानमस्ति न वेत्याशंक्य द
ग्धपटन्यायेन इन्द्रजालनिर्मितसौधसमुद्रादिवच्च बाधितानि चमत्कारित्वातिभानेऽपि परमार्थतया भानं नेत्याह
अयमित्यादिना न पश्यतीत्यन्तेन अत्र मितिसमवात्मविज्ञानमसद्भिमेनिस्मय अस्मिन्नर्थे श्रुतिमाह सचक्षुरिति
उक्तेऽर्थे आचार्यवचनं प्रमाणयति रहतगति स आत्मविन्नान्य इति मे निश्चयः इत्यन्वयः सकृदुपदेशादाह प
इति यः कोऽपि महापुरुषो ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः स एव सुषुप्तावस्थायां यथा द्वैतं न पश्यति
उक्तं चेति

३८

स्यापामविहैतं न पश्यति दृश्यामब्रह्मव्यतिरिक्तजडपदार्थाभावात्स न योक्तः किंच कदाचित् सुप्त्यानदृशा
यामाविद्यकसंस्कारलेशवशाद्द्वितीयत्वादिवस्तुदारेषांस्तं पश्यन्नपि स मायाभ्यासमामर्थ्यवशाद्दृ
श्यत्वेन पश्यति स तत्त्वोक्तः यश्च लोकसंग्रहार्थं नित्यादिकर्माणि कुर्वन्नपि स्वात्मनि कर्तृत्वाभावनिश्च
येन निष्क्रियः कर्मरहितो यः स एव तेन कर्मफलेन न लिप्यते स जीवन्मुक्तो नात्र संशयः कर्त्तव्य इत्यर्थः नत्व

यथेन्द्रजालमिति ज्ञानवानिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति स एवत्त्वमेव दृ
श्य स कार्याऽकर्तृ इति निश्चितेः उक्तंच सुषुप्तिवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चा
द्वयत्वतः तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः श्रुतिस्मृतिज्ञानानन्दवीवि
द्यमानानामासारविद्यादीनामनुवृत्तिवत् कुमवासनानामेवानुवृत्तिर्भवति ॥ ॥

स जीवन्मुक्तस्य योगीन्द्रस्य मम पुण्यपापं च नास्तीत्यभिमानवशाद्यथेष्टाचरणप्रसंगमाशंक्या
पोद्धरति प्रसेति प्रसक्तैवोक्तजीवन्मुक्तस्य ज्ञानाभ्यासेगेवशोभ्यादिगुणैरशुभवासनायानिवारितत्वा
त्संसारदशायामप्रयत्नेनाराराजिशह्निवत् तत्त्वज्ञानोत्तरमपि शुभानामेव वासनानामनुवृत्तिर्भवति ना

39

ननु एवमवासनात्वहेतेरपि प्रयोजनाभावात्किं तदनुवृत्त्येत्यत आह शुभाशुभयोरिति तस्माज्जीवन्मु
क्तस्य यथेष्टाचरणप्रसंगो नास्तीति भावः अस्मिन्नर्थे ग्रंथांतरं संवादयति तदुक्तमिति जीवन्मुक्त,
स्य ब्रह्मज्ञानित्वाभिमानो नास्तीत्यत्रापि संमतिमाह ब्रह्मवित्त्वमिति ननु विदुषां यथेष्टाचरणप्र
संगो नास्तीत्युक्तं तदनुपपन्नं न मातृवधेन न पितृवधेन यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्य
ते हत्वापि स इमाल्लोकान्न हंति न निबध्यत इति अश्वमेधशतसहस्राण्यपि यः कुरुते ब्रह्मघातल
क्षाणि परमात्मवित्पुण्यैर्न च पापैर्लिप्यते मनुजः अश्वमेधसहस्राणि ब्रह्महत्याशतानि च कुर्वन्न
शुभाशुभयोरीदृशीं संवादुक्तं उदाहृतमनन्तमस्य यथेष्टाचरणाय दिश्यतां नहरणं चैव को भे
दोऽस्ति विभक्तयाणमिति ब्रह्मवित्त्वं तथा स्वकाम स्वात्मतो न वेनर इति ।। राम ।।

पि न लिप्येत यद्येकत्वं प्रपश्यति स भयादभयं प्राप्तः अद्यैव वर्त्तते च यः स पुनः स भयं गं तु स्ततं वस्त्र
लक्षेत्कृति आरब्धकर्मनानात्वाद्बुद्धीनामन्यथान्यथा वर्त्तनं तेन शास्त्रार्थविवि स्वांतःस्थं न पंडितैरिमा
दिश्य निस्पृत्याभियुक्तवाक्यो विदुषां यथेष्टाचरणाभोगी कारादिति चेत्सत्यं तेषां तव तव नाना विहत
त्तु तिपरत्वेन तत्कर्त्तव्यमित्यत्र तात्पर्याभावात् तदुक्तमाचार्यैः अधर्माज्जायते ज्ञानं यथेष्टाचरणं ततः धर्म
कार्यैकयतत्साध्यमाधर्मो विनश्यतीति न त्वेवममानित्वमदंभित्वमहिंसा क्षांतिरार्जव इत्यादिस्मृत्युक्त
साधनस्य अद्वेष्टा सर्वभूतानामित्यादिवचनैः प्रतिपाद्यमानानां ष्टत्वाद्विगुणस्य मूढस्य च विदुषां सम

राम
३९

अमानित्वादिसंपादनस्य विविदिषासंन्यासविषयत्वादिदमुक्तं तल्लक्षणेनानेकाकारवत्त्वानुवर्ति
नात्र विरोध इत्याह तदानीमिति जीवन्मुक्तावस्थायामित्यर्थः अस्मिन्नर्थे वार्त्तिककारसंमतिमा
ह तदुक्तमिति अस्य विद्वत्संन्यासजीवन्मुक्तस्याद्वेष्टृत्वाद्यो गुणाः अयत्नेन सन्त एव भवे
ति न तु साधनरूपिणः ते प्रतीते साधनरूपा न भवन्तीत्यत्र हेतुमाह उत्पन्नेति यतः उत्पन्ना
त्मावबोधो ब्रह्मात्मैकनिश्चयरूपः ततः तस्य ते गुणाः लक्षणत्वेनैव भवन्तीत्यन्वयः इयताग्र
न्थेन प्रतिपादितेऽस्मिन्नर्थे तत्सांप्रदायिकग्रन्थे श्रीमत्परमहंसपरिव्राजकाचार्यसंमतेन

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तन्त इत्युक्तं
उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवन्त्यस्य न तु साधनरूपिणः इति ॥

द्योगीश्वरेण महापुरुषेणाद्य वेदान्तो नामेत्यारभ्य साधनचतुष्टयसंपन्नस्य प्रमातुरधिकारिणः
मलाज्ञाननिवृत्तिपरमानन्दप्राप्तिसिद्धये प्रतीयमानाविद्यकसकलप्रपञ्चजातस्य ब्रह्मणाध्या
रोपापवादाभ्यां ससंक्षेपविस्तरेतिः प्रपञ्चतत्प्रतिपादनसाधनश्रवणादिकं प्रपञ्चमभिधाय तत
त्त्वैवाधिकारिणः तत्त्वमस्यादिवाक्यश्रवणानन्तरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेद
बुद्धेः जीवन्मुक्तत्वं प्रदर्शितं एतावतैव कार्यसिद्धिः किं बहुलेखनेनेति मनसि निधाय संग्रहस्यैव
जीवन्मुक्तस्य स्वप्रकाशात्मानन्दानुभवैकनिष्ठस्य भेदप्रतीत्यभावेऽपि अविद्यालेशवशात् प्रारब्धक

किंबहुनाइत्यादिना प्रारब्धफलं त्रिविधं स्वेच्छाकृतं परेच्छाकृतं अनिच्छाकृतं चेति तत्र सुख्यानन्दरूपायायी
सुखदेति तया स्वकीयेच्छया कृतं स्वेच्छाकृतं भिक्षाटनादि समाध्यवस्थायां शिष्यादिभिः दीयमानमन्नादिकं
परेच्छाकृतं समाध्यवस्थायां सुख्यानन्ददशायां वा आकाशफलपातनवदकस्माज्जायमानं पाषाणपतनं
कंटकवेधादिकमनिच्छाकृतं स चायं जीवन्मुक्तः प्रोक्तत्रिविधप्रारब्धप्राप्तिकं सुखदुःखं स्वमनुभवन्नु
बुद्ध्यादिसाक्षितया सर्वावभासकः सन् ततो भोगेनारब्धकर्मक्षये सति प्रत्यगभिन्नपरमात्मनि प्राणादि
लयानंतरं प्रपंचाविषयकसंस्कारः कृतकृतसन्नगलितसकलभेदप्रविभासो ब्रह्मैवावतिष्ठत इतिष्ठ

किंबहुनायं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणानि प्रारब्धफला
न्यनुभवन्नंतःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणेलीने
सत्यज्ञानानंतकार्यसंस्काराणामपि विनाशात् परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासरहि
तमखंडब्रह्मावतिष्ठते

सकलवेदरहस्य तात्पर्यमित्यर्थः अयंजीवन्मुक्तो घटाद्युपाधिविलये सति घटाद्युपाधिविनिर्मुक्ताकाश एव
न्मुक्त इत्युपचारव्यवहारभाग्भवति वस्तुतस्तु प्राग्वामलत्वात् तदुक्तमाचार्यैः न निरोधो न चोत्पत्तिर्न बद्धो न =
च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता अस्य जीवन्मुक्तस्योपाधिविगमसमये प्राणाः खे लीनाः ८
रीरं अतितमनोऽपहृत्य सनीरबिंदुवत्प्रत्यगभिन्नपरमानंदे लीनत्वात् स्थूलशरीरं नोतिष्ठतीति अत्र श्रुति र्फ

नतस्येति अयं जीवन्मुक्तो जीवन्नेव दृश्यमानाद्दाराद्देहादिवंधनाद्विशेषेणामुक्तः सन् वर्तमानदेहपाते सति भावि
देहवंधाद्विशेषेणामुच्यते अत एवात्रापि माद्द विमुक्तश्चेति बृहदारण्यकेऽपि यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदिश्रि
ताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति वाक्यशेषेऽपि जीवन्मुक्तः परमुक्तात्वं देहे कालसात्कृते भवत्येव मुक्त
त्वं एवं तो स्वदृतामिवेति अहं गोप्ययं पुरुष आकाशवत्सर्वगतश्च नित्यः अस्नाविरं शुद्धमपापविद्धमित्यादिश्रुत्या
प्रत्यगात्मनो नित्यत्वपरिपूर्णत्वकूटस्थत्वश्रवणात् उत्पत्याप्तिविकृतिसंस्कारचतुर्विधक्रियाफलविलक्षण
त्वेन विधया नित्यनिरूक्ताविद्यानिवृत्तिमात्रेणाप्राप्तप्राप्तैवात्मा पुनः प्राप्त इत्युपचर्यते अधिष्ठानस्यागमनाभावश्च

नतस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते विमुक्तश्च विमुच्यत इत्यादिश्रुतेः ॥ ॥

यत्तस्य लोकांतरगमनायोगान्न सालोक्यादिमुक्तिसंभवः न च यामस्य मुक्तिर्या साध्यस्य वस्तुनो विद्यमानानर्थ
निवृत्तेश्च पुरुषार्थत्वं दृष्टं अत्र तदभावात्कथं पुरुषार्थत्वमिति चेत् न तयोरेव पुरुषार्थत्वमिति नियमाभावात्
स्वच्छायायामारोपितरक्षसो विस्मृतकंठगतचामीकरस्य प्राप्तपुरुषस्य महावाक्येन तयोर्निवृत्त्या तयोरपि पुरुषा
र्थत्वदृष्टेः अत्र संग्रहः आत्माज्ञानमलानिरस्तममलं धामैव तत्त्वं परं कंठस्थाभरणादिवन्नु भवत्यान्छायापिशा
चीयथा आत्मज्ञानाप्तिनिवृत्तिवत् तिरोवाक्याद्गुरोः स्थितात्तद्वत्तत्त्वं ज्ञाततानिराममतः परमात्मपदं प्राप्तं तयोरुच्यत इति
न च मुक्तानामपि विशिष्टमीश्वरप्रभृतीनामयरोऽस्त्यज्ञानानिमाः पुनर्देहानस्थ श्रवणात्केवलज्ञानोत्पत्तिसमये एवा
स्मदज्ञानानामस्माकं मुक्तिर्भवतीति कथं विश्वासिमः अतो ज्ञानव्यतिरिक्तमप्युपायांतरं किंचित्कर्तव्यमिति

वे॰सा॰ वाक्यश्रवणस्य प्रमाणत्वादेव तदुपपत्तेः ब्रह्मविद्ब्रह्मैव भवति तरति शोकमात्मविदित्यादिश्रुतिभिर्ज्ञानोत्पत्तिसमय एव
५८ वमुक्तिप्रतिपादनात् उक्तं च तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहं ज्ञानसमकालमुक्तः कैवल्यं या
ति हतशोकः इति वशिष्ठादीनां त्वाधिकारिकपुरुषत्वेन यावदधिकारमारब्धवेगप्रयुक्तशापादिना स्वीकृतावांत
५१ रदेहपातेऽपि तद्देहाभावियोगस्य निवारयितुमशक्यत्वात् प्रारब्धस्य किंतु भोगेन नश्यत्वात् उपपत्तेः यावदधिकारम
वस्थितिराधिकारिणामिति भगवद्व्यासेन विशेषितत्वात् अस्मदादीनां च प्रारब्धकर्मणोनेकदेहारंभकत्वसंभवे
पि चरमदेहविनाशः परोक्षज्ञानान्तरसंभवात् वामदेवेन याऽन्दृष्टत्वात् अन्यथा गर्भस्थस्य श्रवणाद्यसंभवेन ज्ञा
नोत्पत्त्यनुपपत्तेः ननु ज्ञानिनामपि स्वप्नावस्थायां देहान्तरस्वीकारवज्जन्मान्तरानामपि पुनर्देहान्तरस्वीकारः किं न
स्यादिति चेत् न कंठे स्वप्नसमाविष्टोदिनादित्याको पुकंठान्निर्गमनाभावश्रवणाद्देहान्तरप्राप्तस्तत्रान्तरप्रतिपत्ता
विदित्यत्र देहान्निर्गमनश्रवणाद्विषमं तदुक्तं स्कांदे यस्मिन्देहे ज्ञानमपरोक्षं विजायते तद्देहपातपर्यन्तं संसारदर्शी
न पुनरपि नास्ति संसारदर्शनं परमार्थतः कुतस्तद्दर्शनं देहविनाशाद्दृढमुच्यते तस्माद्ब्रह्मात्मविज्ञानाद्देहं च रम
विग्रहे जायते मुक्तिर्ज्ञानप्रसादादेव मुच्यते इति तस्मात्सुष्ठूक्तं विमुक्तश्च विमुच्यत इति नित्यशुद्धपरिपूर्णम
हं यस्सच्चिदात्मकमात्मतत्त्वं सर्वदा सुखमवाप तत्कृतैर्वृजितं सदहमस्मि तत्परं गोवर्धनप्रेरणया विमुक्त
तेन च पवित्रे नरसिंहयोगी वेदान्तसारस्य चकार टीकां सुबोधिनी विश्वपतेः पुरस्तात् जाते पंचशताधिके दशशतसं
वत्सराणां पुनः संजाते दशवत्सरे प्रभवके श्रीशालिवाहे शाके प्राप्ते दुर्मुखवत्सरे शुभ मधौ मासे नवम्यां तिथौ प्रा राम॰
५८

वे॰सा॰ सेभार्गववासरेनरहरिष्टीकांचकारोज्ज्वलां इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्रामानंदभगवत्पूज्यपादशि
र॰ ष्यनरसिंहसरस्वतीविरचितावेदांतसारटीकासमाप्तासंपूर्णम् ॥ ॥ ॥ ॥ ॥
४२

५२

राम॰
४२